Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥३७॥

॥ श्रीजिनाय नमः ॥

# ॥ श्रीविक्रमभूपचरित्रं ॥

(मूलकर्ता—श्रीवर्धमामसूरिः)

अन्वय सहित भाषांतरकर्ता तथा छपावी प्रसिद्ध कर्ता—पण्डित श्रावक हीरालाल हंसराज. (जामनगरवाला)

(आ ग्रंथना अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्व हक स्वाधिन राख्या छे.)

सने १९२९. मूल्य रु. १—८—० सं १९८५

Printed at Jain Bhaskaroday Printing Press, JAMNAGAR.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥श्रीजिनाय नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ अथ श्रीविक्रमभूपचरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः ) ( सम्यक्त्वव्रतउपर )

**सर्वज्ञे सद्गुरौ धर्मे या श्रद्धा हृदि निश्चला । सम्यक्त्वमिति तत्त्वज्ञैर्विज्ञेयं हितमात्मनः ॥ १ ॥**

अन्वयः–सर्वज्ञे, सद्गुरौ, धर्मे या हृदि निश्चला श्रद्धा, इति सम्यक्त्वं तत्त्वज्ञैः आत्मनः हितं विज्ञेयं. ॥ १ ॥

अर्थः–सर्वज्ञ प्रभुमां, सद्गुरुमां अने धर्ममां अंतःकरणपूर्वक जे निश्चल श्रद्धा ते सम्यक्त्व कहेवाय, अने ते सम्यक्त्वने तत्वज्ञोए आत्मानुं हित करनारुं जाणवुं. ॥ १ ॥

**अस्य प्रभावाज्जायन्ते देवाः सेवाभृतो नृणाम् । विस्तारिण्यः श्रियः सर्वा यथा विक्रमभूपतेः ॥ २ ॥**

अन्वयः–अस्य प्रभावात् यथा विक्रम भूपतेः, नृणां देवाः सेवा भृतः, विस्तारिण्यः सर्वाः श्रियः जायंते. ॥ २ ॥

अर्थः—ते सम्यक्त्वना प्रभावथी विक्रम राजानीपेठे माणसोने देवो पण सेवा करनारा थाय छे, तथा सघळी विस्तीर्ण लक्ष्मी पण प्राप्त थाय छे, ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाहि–जम्बूद्वीपेऽस्ति कुसुमपुरं कुसुमसंनिभम् । यत्र स्वर्णमयावासभासः केसरतां दधुः ॥ ३ ॥

अन्वयः–तथाहि–जंबू द्वीपे कुसुम सन्निभं कुसुमपुरं अस्ति, यत्र स्वर्णमय आवास भासः केसरतां दधुः. ॥ ३ ॥

अर्थः–ते विक्रमराजानुं दृष्टांत कहे छे, जंबूद्वीपमां पुष्पसरखुं कुसुमपुर नामनुं नगर छे, के जेमां (रहेला) सुवर्णना मेहेलोनी कांति (ते पुष्पना) केसरतंतुपणाने धारण करे छे. ॥ ३ ॥

राजास्मिन्हरितिलको भूवधूतिलकोऽजनि । नाम्ना गौरीति कान्तास्य गौरी कान्तगुणैरभूत् ॥ ४ ॥

अन्वयः—अस्मिन भू वधू तिलकः हरितिलकः राजा अजनि, अस्य कांत गुणैः गौरी गौरी इति नाम्ना कांता अभूत्. ॥४॥

अर्थः—ते नगरमां पृथ्वीरूपी स्त्रीना तिलकसरखो हरितिलकनामे राजा हतो, तेने मनोहर गुणोथी शोभती गौरीनामनी राणी हती.

उपयाचितलक्षाभिर्दक्षलक्ष्यसुलक्षणः । तयोरपुत्रतादोषच्छेदनो नन्दनोऽभवत् ॥ ५ ॥

अन्वयः—उपयाचित लक्षाभिः तयोः दक्ष लक्ष्य सुलक्षणः, अपुत्रता दोष च्छेदनः नंदनः अभवत्. ॥ ५ ॥

अर्थः—लाखो गमे मानताओवडे तेओने, चतुर माणसोने देखातां उत्तम लक्षणोवाळो, तथा अपुत्रपणाना दोषने दूर करनारो पुत्र थयो. ॥ ५ ॥

अस्मिन्गर्भस्थिते राज्ञा जिता विक्रमतोऽरयः । अतो विक्रम इत्याख्यामस्याम्बाकारयन्महैः ॥ ६ ॥

अन्वयः—अस्मिन् गर्भ स्थिते राज्ञा विक्रमतः अरयः जिताः, अतः अंबा महैः अस्य विक्रमः इति आख्यां अकारयत्. ॥६॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अर्थः–ते पुत्र गर्भमां आव्येथी राजाए (पोताना) विक्रमथी शत्रुओने जीत्या, तेथी माताए महोत्सवपूर्वक तेनुं 'विक्रम' नाम पाड्युं.

**समये विनयी सोऽयमुपाध्यायवशंवदः । अधीती सर्वशास्त्रेषु निष्णः कृत्स्नकलास्वभूत् ॥ ७ ॥**

अन्वयः—समये विनयी, उपाध्याय वशंवदः सः अयं सर्व शास्त्रेषु अधीती, कृत्स्न कलासु निष्णः अभूत्. ॥ ७ ॥

अर्थः–समय आवे विनयी अने अध्यापकना कहेवा प्रमाणे वर्तनारो ते आ विक्रमकुमार सर्व शास्त्रोनो अभ्यासी तथा सर्व कलाओमां निपुण थयो. ॥ ७ ॥

**कामेभक्रीडनारण्ये तारुण्ये यातुमुद्यतम् । द्वात्रिंशन्नृपकन्याभिर्नृपस्तं पर्यणाययत् ॥ ८ ॥**

अन्वयः–काम इभ क्रीडन अरण्ये तारुण्ये यातुं उद्यतं तं, नृपः द्वात्रिंशत् कन्याभिः पर्यणाययत्. ॥ ८ ॥

अर्थः—कामदेवरूपी हाथीने क्रीडा करवाना वनसरखा यौवनने प्राप्त थवाने तैयार थयेला एवा ते कुमारने राजाए बत्रीस कन्याओसाथे परणाव्यो. ॥ ८ ॥

**यावद्दिव्येष्वसौ ताभिर्द्वात्रिंशद्वासवेश्मसु । रन्तुं प्रववृते तावदकस्माद्व्याधिभिर्वृतः ॥ ९ ॥**

अन्वयः—यावत् असौ दिव्येषु द्वात्रिंशत् वासवेश्मसु ताभिः रंतुं प्रववृते, तावत् अकस्मात् व्याधिभिः वृतः ॥ ९ ॥

अर्थः–पछी जेवामां ते मनोहर बत्रीस आवासोमां रहीने तेओनी साथे विलासमां जोडायो, एवामां अचानक ते रोगोवडे घेराइ गयो.

**कुष्टकासज्वरश्वासशोफशूलजलोदरैः । शिरोऽर्तिगड्डुदृक्पीडावान्तिवातैश्च सोऽर्दितः ॥ १० ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः–कुष्ट कास ज्वर श्वास शोफ शूल जलोदरैः, च शिरः अर्तिं गडु दृक् पीडा वांति वातैः सः अर्दितः ॥ १० ॥

अर्थः–कोढ, खांसी, ताव, श्वास, सोजा, शूल, जलोदर, तथा मस्तकनो दुःखावो, गड, आंखोनी व्याधि, उलटी अने वायुवडे ते पीडावा लाग्यो. ॥ १० ॥

**उपयाचितबस्त्यादिकर्ममन्त्रौषधक्रियाः । सर्वं व्यर्थमभूदस्मिन्हितं वाक्यं जडे यथा ॥ ११ ॥**

अन्वयः—यथा जडे हितं वाक्यं, (तथा) अस्मिन् उपयाचित बस्ति आदि कर्म मंत्र औषध क्रियाः, सर्वं व्यर्थं अभूत्. ॥११॥

अर्थः–जेम मूर्खने कहेलुं हितवचन निष्फल जाय, तेम तेनेमाटे करेली मानताओ, जुलाबआदिकनी क्रिया, मंत्र तथा औषधोनी क्रिया, ए सघळुं निष्फल थयुं. ॥ ११ ॥

**शीर्णनासौष्ठहस्तांघ्रिरत्यर्थं व्यथितोऽर्तिभिः । अनल्पं तल्पगः कष्टं रारटीति स्म सोऽनिशम् ॥ १२ ॥**

अन्वयः–शीर्णनासा ओष्ट हस्त अंघ्रिः सः अर्तिभिः अत्यर्थं व्यथितः तल्पगः अनिशं कष्टं रारटीतिस्म. ॥ १२ ॥

अर्थः–सडी गयां छे नासिका, होठ, हाथ तथा पगो जेना एवो ते व्याधिथी अत्यंत पीडायोथको हमेशां कष्टपूर्वक बूमो मारी रडवा लाग्यो. ॥ १२ ॥

**ततः पुरबहिःस्थस्य प्रसिद्धस्यार्तिशान्तये । धनंजयस्य यक्षस्य स मेने महिषाञ्शतम् ॥ १३ ॥**

अन्वयः–ततः सः अर्तिं शांतये पुर बहिः स्थस्य धनंजयस्य यक्षस्य शतं महिषान् मेने. ॥ १३ ॥

अर्थः–पछी तेणे ते पीडानी शांतिमाटे नगरनी बहार रहेला धनंजयनामना यक्षने एकसो पाडा चडाववानी मानता करी. ।१३।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदा विमलकीर्त्याख्यः केवली केलिकानने । दुःकर्मतिमिरत्रासवासरः समवासरत् ॥ १४ ॥

अन्वयः—तदा केलि कानने दुःकर्म तिमिर त्रास वासरः विमलकीर्ति आख्यः केवली समवासरत्. ॥ १४ ॥

अर्थः—ते वखते क्रीडावननी अंदर दुष्कर्मरूपी अंधकारनो नाश करवामां सूर्यसरखा विमलकीर्तिनामना केवली भगवान (आवीने) समोसर्या. ॥ १४ ॥

ततः केवलिनं नन्तुं भूभता भूरिभक्तिभाक् । चचालानन्दसंदर्भोज्जागैर्नागैर्वृतः ॥ १५ ॥

अन्वयः— ततः भूरि भक्तिभाक्, आनंद संदर्भ उज्जागैः नागरैः वृतः भूभर्ता केवलिनं नंतुं चचाल. ॥ १५ ॥

अर्थः—पछी घणी भक्तिवाळो, तथा आनंदना उभराथी उत्सुक थयेला नगर जनोथी वींटायेलो ते हरितिलकराजा ते केवली भगवानने वांदवामाटे चाल्यो. ॥ १५ ॥

तद्विज्ञाय तदा विज्ञो विक्रमोऽपि व्यचिन्तयत् । लाभैर्लोभा इव रुजो हा वर्धन्ते ममौषधैः ॥ १६ ॥

अन्वयः—तत् विज्ञाय तदा विज्ञः विक्रमः अपि व्यचिंतयत्, हा ! लाभैः लोभाः इव मम रुजः ओषधैः वर्धंते. ॥ १६ ॥

अर्थः—ते जाणीने ते वखते ते चतुर विक्रम कुमार पण विचारवा लाग्यो के, अरेरे ! लाभथी लोभनी पेठे मारा रोगो तो औषधोथी ( उलटा ) वृद्धि पामे छे. ॥ १६ ॥

मुद्रामण्डलमन्त्रैस्तैरौषधैरुपयाचितैः । भग्नं मद्व्याधिषूदग्रैर्दन्तिदन्तैरिवाद्रिषु ॥ १७ ॥

अन्वयः—अद्रिषु उदग्रैः दंति दंतैः इव, मद् व्याधिषु तैः मुद्रा मंडल मंत्रैः, औषधैः उपयाचितैः भग्नं. ॥ १७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अर्थः—पर्वतोप्रते हाथीना मजबूत दांतोनीपेठे, मारी आ व्याधिओ पासे ते मुद्राओ, मंडलो, मंत्रो, औषधो तथा मानताओ पण थाकी गयां. ॥ १७ ॥

**तन्मे दर्पादमी रोगसर्पाः सर्पन्ति यद्बलात् । तत्तमः शमयाम्यद्य ज्ञानभानुं भजे मुनिम् ॥ १८ ॥**

अन्वयः—तत् मे अमी रोग सर्पाः यत् बलात् दर्पात् सर्पंति, तत् तमः अद्य शमयामि, ज्ञान भानुं मुनिं भजे. ॥ १८ ॥

अर्थः—माटे मारा आ रोगोरूपी सर्पो जेना बलथी पोतानुं जोर तजे ते अज्ञानरूपी अंधकारने हुं उपशमावुं, अने ते माटे ज्ञानथी सूर्यसरखा एवा, आ मुनिराजनी हुं सेवा करुं. ॥ १८ ॥

**अथ व्यजिज्ञपद् भूपमसावुद्यमसाहसी । शमराशिं नमस्कर्तुं समं नयत मामिति ॥ १९ ॥**

अन्वयः—अथ उद्यम साहसी असौ भूपं इति व्यजिज्ञपत्, शम राशिं नमस्कर्तुं मां समं नयत? ॥ १९ ॥

अर्थः—पछी उद्यम करवामां साहसिक एवा ते विक्रम कुमारे राजाने एवी विनंति करी के, शांतिना समूह सरखा (ते केवली भगवानने) वांदवामाटे मने साथे लेइ जाओ ? ॥ १९ ॥

**मुक्तालिखचितश्मश्रु मुखमश्रुकणैः सृजन् । नृपोऽथ नृविमानेन समं तमनयत्सुखम् ॥ २० ॥**

अन्वयः—अथ नृपः अश्रु कणैः मुक्ता आलि खचित श्मश्रु मुखं सृजन्, तं नृ विमानेन सुखं समं अनयत्. ॥ २० ॥

अर्थः—पछी ते राजा आंसुओना बिंदुओथी (जाणे) मोतीओनी श्रेणिथी भरेलां दाढी मूछवाळां (पोतानां) मुखने रचतोथको ते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विक्रमकुमारने पालखीमां बेसाडीने सुखेथी साथे लेइ गयो. ॥ २० ॥

**स्वर्णाब्जविष्टरक्रोडनिविष्टं कलभाषिणम् । नृपः समं कुमारेण मुनिहंसं ननाम तम् ॥ २१ ॥**

अन्वयः—स्वर्ण अब्ज विष्टर क्रोड निविष्टं, कल भाषिणं तं मुनि हंसं नृपः कुमारेण समं ननाम. ॥ २१ ॥

अर्थः—सुवर्णना कमलपर रहेलां सिंहासनना मध्य भागमां बिराजेला, तथा मधुर वचन बोलता, एवा मुनिराजरूपी हंसने राजाए कुमारसहित वंदन कर्युं. ॥ २१ ॥

**ततो मुनिर्मनुष्याणां हरन्पापमिषं विषम् । वाचा सुधाद्रवाचारधारिण्या धर्ममादिशत् ॥ २२ ॥**

अन्वयः—ततः मनुष्याणां पाप मिषं विषं, सुधा द्रव आचार धारिण्या वाचा हरन् मुनिः धर्म आदिशत्. ॥ २२ ॥

अर्थः—पछी मनुष्योनां पापरूपी विषने, अमृतरसना प्रवाहसरखी वाणीथी हरताथका ते मुनिमहाराज धर्मदेशना आपवा लाग्या. २२

**पप्रच्छ देशनान्तेऽथ विक्रमोक्त्या मुनिं नृपः । किं कुमारोऽयमारोग्यमारोहति न सर्वथा ॥ २३ ॥**

अन्वयः—अथ देशना अंते नृपः विक्रम उक्त्या मुनिं पप्रच्छ, अयं कुमारः सर्वथा आरोग्यं किं न आरोहति ? ॥ २३ ॥

अर्थः—पछी देशना पूरी थयाबाद राजाए ते विक्रम कुमारना कहेवाथी मुनिराजने पूछयुं के, ( हे भगवन्! ) आ ( मारो ) कुमार सर्वथा प्रकारे निरोगी केम थतो नथी ? ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**व्यक्तदृश्यस्फुरद्धर्म इवास्ये दशनांशुभिः । ऊचेऽथ केवली ज्ञानकवलीकृतसंशयः ॥ २४ ॥**

अन्वयः-अथ दशन अंशुभिः आस्ये व्यक्त दृश्य स्फुरत् धर्मः इव, ज्ञान कवलीकृत संशयः केवली ऊचे. ॥ २४ ॥

अर्थः—त्यारे दांतोना किरणोवडे मुखमां प्रगट देखाता स्फुरायमान जाणे साक्षात् धर्मज होय नही एवा, तथा ज्ञानवडे नष्ट करेल छे संदेह जेमणे, एवा ते केवली भगवान् बोल्या के, ॥ २४ ॥

**पुरेऽपरविदेहोर्वीरत्ने रत्नस्थलाभिधे । पद्माख्यश्छद्मनां सद्म कुराजन्यः पुराजनि ॥ २५ ॥**

अन्वयः-पुरा अपर विदेह उर्वी रत्ने रत्न स्थल अभिधे पुरे छद्मनां सद्म पद्म आख्यः कुराजन्यः अजनि. ॥ २५ ॥

अर्थः—पूर्वे अपर विदेहनी भूमिपर रत्नसरखा रत्नस्थल नामना नगरमां कपटना स्थानसरखो पद्मनामे (एक) दुष्ट राजा हतो.

**स मृगव्यरसव्यग्रो भूतलं वन्यमन्यदा । ययौ सुयशसं साधुं कयोत्सर्गे ददर्श च ॥ २६ ॥**

अन्वयः—मृगव्य रस व्यग्रः सः अन्यदा वन्यं भूतलं ययौ, च कायोत्सर्गे सुयशसं साधुं ददर्श. ॥ २६ ॥

अर्थः—शिकारना रसमां आसक्त थयेलो ते राजा एक दिवसे वनभूमिमां गयो, अने ( त्यां ) तेणे कायोत्सर्गध्यानमां रहेला सुयशनामना मुनिने जोया. ॥ २६ ॥

**स धर्मज्ञानयोर्वैरी धर्मज्ञानसमाश्रये । साधोरुरसि निःशङ्कः कङ्कपत्रं निखातवान् ॥ २७ ॥**

अन्वयः-धर्म ज्ञानयोः वैरी सः, धर्म ज्ञान समाश्रये साधोः उरसि निःशंकः कंकपत्रं निखातवान्. ॥ २७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः–धर्म अने ज्ञानना शत्रु एवा ते पद्मराजाए, धर्म अने ज्ञानना स्थान सरखां ते साधुना हृदयमां निःशंकपणे छरी भोंकी दीधी. २७

मिथ्यादुःकृतवाक्साधुः स्वव्यलीकविशङ्कया । पपात घातव्यग्रोऽथ धर्माधारतरुर्धराम् ॥ २८ ॥

अन्वयः– अथ स्व व्यलीक विशंक । मिथ्या दु कृत वाक्, धर्म आधार तरुः साधुः घात व्यग्रः धरां पपात. ॥ २८ ॥

अर्थः–त्यारे मारी पोतानी कंइंक भूल थइ छे, एवी शंकाथी " मिथ्या दुष्कृत " बोलता, अने धर्मना आधारभूत वृक्षसरखा, ते साधु ते छरीना घाथी बेभान थइने पृथ्वीपर पडी गया. ॥ २८ ॥

जनं धिगिति जल्पन्तं निघ्नन्भूपोऽथ मन्त्रिभिः । पापश्रीकौतुकशुकः कृतः क्षिप्त्वाशु पञ्जरे ॥ २९ ॥

अन्वयः–अथ धिक् इति जल्पंतं जनं निघ्नन् भूपः मंत्रिभिः आशु पंजरे क्षिप्त्वा पाप श्री कौतुक शुकः कृतः. ॥ २९ ॥

अर्थः–पछी ( आ दुष्कार्यथी ) तेने धिक्कार आपता लोकोने मारता एवा आ राजाने मंत्रिओए तुरत पांजरामां पूरीने पापलक्ष्मीने क्रीडा करवाना शुकसरखो बनावी दीधो. ॥ २९ ॥

न्यस्य तस्य सुतं राज्ये पुण्डरीकं स भूपतिः । सचिवैः पञ्जराद्युक्तममोचि निरयोचितः ॥ ३० ॥

अन्वयः–तस्य सुतं पुंडरीकं राज्ये न्यस्य, निरय उचितः सः भूपतिः सचिवैः पंजरात् युक्तं अमोचि. ॥ ३० ॥

अर्थः–पछी तेना पुंडरीकनामना पुत्रने राज्यपर स्थापन करीने, नरकमां जवाने योग्य एवा ते राजाने मंत्रीओए युक्तिपूर्वक पांजरामांथी छूटो कर्यो. ॥ ३० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**सुयशा मुनिराजस्तु स्मरन्पञ्चनमस्कृतीः । षड्जीववर्गान्क्षमयन्सुरोऽभूल्लवसत्तमः ॥ ३१ ॥**

अन्वयः—सुयशाः मुनिराजः तु पंचनमस्कृतीः स्मरन षड् जीववर्गान् क्षमयन लव सप्तमः सुरः अभूत्. ॥ ३१ ॥

अर्थः—हवे ते सुयश मुनिराज तो पंच परमेष्टिना नमस्कारोनुं स्मरण करताथका, तथा छकायना जीवोने खमावताथका देव थया.

**स तु राजा वहन्वैरं साधुवर्गे निरर्गलम् । न जनैर्निन्द्यमानोऽपि तत्पुरोद्यानमत्यजत् ॥ ३२ ॥**

अन्वयः–सः राजा तु साधु वर्गे निरर्गलं वैरं वहन्, जनैः निंद्यमानः अपि तत् पुर उद्यानं न अत्यजत्. ॥ ३२ ॥

अर्थः—ते दुष्ट राजाए तो साधुओना समुदायपर अत्यंत वैर धारण करतां थकां, अने लोकोवडे निंदातां छतां पण, ते नगरना वननो त्याग कर्यो नही. ॥ ३२ ॥

**ध्यानाधीनो यशोधौतव्योमा सोमाभिधो मुनिः । तेनोर्व्यां दण्डपातेनापाति स्वात्मेव दुर्गतौ ॥ ३३ ॥**

अन्वयः–ध्यान अधीनः, यशः धौत व्योमा, सोम अभिधः मुनिः, तेन स्व आत्मा दुर्गतौ इव, दंड पातेन उर्व्यां अपाति.।३३।

अर्थः—( पछी एक दिवसे ) ध्यानने आधीन थयेला, तथा ( पोताना ) यशथी आकाशने पण निर्मल करनारा, एवा सोमनामना मुनिने, ते (दुष्ट) राजाए, जाणे पोताना आत्माने दुर्गतिमां पाडतो होय नही! तेम दंडना घातथी पृथ्वीपर पाडी नाख्या.

**क्ष्माजन्तून्क्षमयित्वाङ्गं संमार्ज्य प्रतिमास्थितः । मुनिस्तथैव घातेनापाति पातकिनामुना ॥ ३४ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः—क्ष्माजंतून् क्षमयित्वा, अंगं प्रमार्ज्य, तथैव प्रतिमा स्थितः मुनिः अमुना पातकिना घातेन अपाति. ॥ ३४ ॥

अर्थः—( पछी ) पृथ्वीकायना जीवोने खमावीने, तथा शरीर प्रमार्जीने पाछा पूर्वनीपेठेज कायोत्सर्ग ध्यानमां उभेला ते मुनिने ते पापी राजाए ( पाछो ) प्रहार करीने पाडी नाख्या. ॥ ३४ ॥

**इत्येष पौनःपुन्येन कुर्वन्पुण्येन साधुना । अवधिज्ञानविज्ञाततद्भावेनेति भर्त्सितः ॥ ३५ ॥**

अन्वयः—इति पौनःपुन्येन कुर्वन् एषः, अवधि ज्ञान विज्ञात तद्भावेन पुण्येन साधुना इति भर्त्सितः. ॥ ३५ ॥

अर्थः—ए रीते वारंवार करता एवा ते राजाने, अवधिज्ञानथी जाणेलो छे तेना मननो भाव जेणे, एवा ते पवित्र साधुए नीचे मुजब तिरस्कार आप्यो. ॥ ३५ ॥

**निघ्नन्साधूञ्शमागाधान्रे रे दुष्ट स्वतुष्टये । न चेद्भातोऽस्यघात्तत्किं मादृग्भ्योऽपि बिभेषि न ॥ ३६ ॥**

अन्वयः—रे ! रे ! दुष्ट ! स्व तुष्टये शम अगाधान साधून् निघ्नन्, चेत् अघात् न भीतः असि, मादृग्भ्यः अपि किं न बिभेषि ?

अर्थः—अरेरे ! दुष्ट ! पोतानी मोज माटे, शांतिथी गंभीर साधुओने मारतां जो तुं कदाच पापथी नथी डरतो, तोपण माराजेवाथी पण शुं तुं डरतो नथी ? ॥ ३६ ॥

**शमिनः सुयशोमुख्या हन्त त्वामसहन्त रे । नाहं सहिष्ये हन्म्येष स्वाभीष्टं स्मर दैवतम् ॥३७॥**

अन्वयः—रे ! हंत ! सुयशः मुख्याः शमिनः त्वां असहंत, एषः अहं न सहिष्ये, हन्मि, स्व अभीष्टं दैवतं स्मर ? ॥ ३७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अर्थः—अरेरे! दुष्ट! सुयशआदिक मुनिओए तारुं सहन कर्युं छे, आ हुं ते सहन करवानो नथी, (हमणा तने) मारी नाखुं छुं, माटे तारा इष्टदेवनुं तुं स्मरण कर? ॥ ३७ ॥

इत्युक्त्वा तडितेव द्रुं तं तेजोलेश्यया मुनिः । भस्मीकृत्य द्रुतं प्राप पयोद इव शान्तताम् ॥ ३८ ॥

अन्वयः—इति उक्त्वा मुनिः, तडिता द्रुं इव तेजोलेश्यया द्रुतं तं भस्मीकृत्य पयोदः इव शांततां प्राप. ॥ ३८ ॥

अर्थः—एम कहीने ते मुनि, वीजळीथी वृक्षनी पेठे, तेजोलेश्याथी तुरत तेने (बाळीने) भस्मीभूत करी मेघनी पेठे शांत थया.

भूपोऽथ पापभारेण समुत्पतितुमक्षमः । अधोगतीनामवधिं सप्तमीं दुर्गतिं गतः ॥ ३९ ॥

अन्वयः—अथ पाप भारेण समुत्पतितुं अक्षमः भूपः, अधः गतीनां अवधिं सप्तमीं दुर्गतिं गतः ॥ ३९ ॥

अर्थः—पछी पापना भारथी उंचे जवाने असमर्थ एवो ते राजा, नीचीगतिनी सीमासरखी सातमी नरकमां गयो. ॥ ३९ ॥

सोऽप्यालोच्य प्रतिक्रम्म तदतिक्रम्य पातकम् । मुनिस्तीव्रतपस्तप्त्वा दिवमायुःक्षयादगात् ॥ ४० ॥

अन्वयः—सः मुनिः अपि आलोच्य, मतिक्रम्य तत् पातकं अतिक्रम्य तीव्र तपः तप्त्वा आयुः क्षयात् दिवं अगात्. ॥ ४० ॥

अर्थः—(पछी) ते सोममुनि पण आलोचना लेइने, पडिकमीने, ते पापने ओळंगीने, आकरो तप तपी आयु समाप्त ययेथी देवलोकमां गया. ॥ ४० ॥

स भूरमणजीवस्तु स्वयंभूरमणार्णवे । अप्रतिष्ठाननरकादुध्धृतस्तमितां गतः ॥ ४१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः—सः भू रमण जीवः तु अप्रतिष्ठान नरकात् उध्धृतः, स्वयंभू रमण अर्णवे तिमितां गतः. ॥ ४१ ॥

अर्थः—(पछी) ते राजानो जीव तो ते सातमी नरकमांथी उद्धरीने स्वयंभूरमण नामना महासागरमां मत्स्यपणे उत्पन्न थयो.

**स तिमिः सप्तमीमेव जगाम जगतीं ततः । ततोऽप्युध्धृत्य मत्स्योऽभूद्गतः षष्ठीं च दुर्गतिम् ॥ ४२ ॥**

अन्वयः—सः तिमिः ततः सप्तमीं एव जगतीं गतः, ततः अपि उध्धृत्य मत्स्यः अभूत्, च षष्ठीं दुर्गतिं गतः ॥ ४२ ॥

अर्थः—ते मत्स्य त्यांथी पाछो सातमीज नरकमां गयो, अने त्यांथी पण निकळीने पाछो मत्स्य थयो, अने त्यांथी निकळीने छट्ठी नरके गयो. ॥ ४२ ॥

**चण्डालस्त्रीभवं प्राप्य पुनस्तत्रैव यातवान् । ततः कुम्भीनसो भूत्वा स भूमीं पञ्चमीं गतः ॥ ४३ ॥**

अन्वयः—चंडाल स्त्री भवं प्राप्य, पुनः तत्र एव यातवान्, ततः कुंभीनसो भूत्वा सः पंचमीं भूमिं गतः. ॥ ४३ ॥

अर्थः—पछी चंडालनी स्त्रीनो भव पामीने पाछो तेज छट्ठी नरकमां गयो, त्यांथी भयंकर सर्प थइने ते पांचमी नरके गयो.

**पुनर्जगाम तामेव भुवं मीनभवान्तरः । मृगनाथः स भूत्वाथ तुरीयं निरयं गतः ॥ ४४ ॥**

अन्वयः—पुनः मीन भव अंतरः तां एव भुवं जगाम, अथ मृगनाथः भूत्वा सः तुरीयं निरयं गतः. ॥ ४४ ॥

अर्थः—वळी पाछो वच्चे मत्स्यनो भव करीने तेज पांचमी नरकमां गयो. तथा पछी सिंह थइने ते चोथी नरके गयो. ॥४४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**पुनस्तत्रैव पाठीनशरीरान्तरितोऽगमत् ॥ श्येनीभूय तृतीयं स इयाय निरयं ततः ॥ ४५ ॥**

अन्वयः—पुनः पाठीन शरीर अंतरितः तत्र एव अगमत्, ततः श्येनीभूय सः तृतीयं निरयं इयाय. ॥ ४५ ॥

अर्थः—पाछो वच्चे मत्स्य थइने ते त्यां चोथी नरकमांज गयो, अने पाछो सकरो थइने ते त्रीजी नरके गयो. ॥ ४५ ॥

**गृध्रदेहं गृहीत्वाथ गतस्तामेव दुर्गतिम् । द्वितीयां भुजगो भूत्वा जगाम जगतीं च सः ॥ ४६ ॥**

अन्वयः-अथ गृध्र देहं गृहीत्वा तां एव दुर्गतिं गतः, च भुजगः भूत्वा सः द्वितीयां जगतीं जगाम. ॥ ४६ ॥

अर्थः—वळी गीधनुं शरीर धारण करीने पाछो तेज त्रीजी नरके गयो, तथा पछी सर्प थइने ते बीजी नरके गयो. ॥ ४६ ॥

**सोऽगमद्भोगभृद्भूय तत्र भूयोऽपि दुर्गतौ । तिमीभूयागमदसौ प्रथमां पृथिवीमथ ॥ ४७ ॥**

अन्वयः—भोगभृत् भूय सः भूयः अपि तत्र दुर्गतौ गतः, अथ तिमीभूय असौ प्रथमां पृथिवीं अगमत्. ॥ ४७ ॥

अर्थः—वळी सर्प थइने ते पाछो तेज बीजी नरके गयो, तथा पछी मत्स्य थइने ते पहेली नरके गयो. ॥ ४७ ॥

**अजायत स जीवोऽथ पक्ष्येको विकलेन्द्रियः । हीनेन्द्रियचर्यास्तिर्यग्नीचजातिर्नरः सुरः ॥ ४८ ॥**

अन्वयः—अथ सः जीवः पक्षी, एकः, विकल इंद्रियः, हीन इंद्रिय चयः, तिर्यक्, नीच जातिः नरः सुरः अजायत. ॥ ४८ ॥

अर्थः—वळी ते जीव पक्षी, एकेंद्रिय, विकलेंद्रिय, इंद्रियोना हिन समूह वाळो तिर्यच, नीच जातिवाळो मनुष्य अने देव थयो. ४८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**नारकश्चेति शतशः सोऽभूद्भवचरश्चिरम् । नानायोनिभवां भूरिपराभूतिं समाश्रयत् ॥ ४९ ॥**

अन्वयः—च नारकः, इति सः शतशः भवचरः अभूत्, चिरं नाना योनि भवां भूरि पराभूतिं समाश्रयत्. ॥ ४९ ॥

अर्थः–पाछो (वच्चे भवांतर करीने) ते नारकी थयो, एम ते सेंकडो वखत विविध भवोमां रखड्यो, अने घणा काळसुधी ते ते विविध जन्मोमां थयेली घणी वेदनाओ तेणे सहन करी. ॥ ४९ ॥

**आकुलः कष्टकोटीभिर्बन्धव्यथवधादिभिः । भवे भवे स पञ्चत्वमवाप व्यापदां पदम् ॥ ५० ॥**

अन्वयः–व्यापदां पदं सः बंध व्यथ वध आदिभिः कष्टकोटीभिः आकुलः सः भवे भवे पंचत्वं अवाप. ॥ ५० ॥

अर्थः—दुःखोनां स्थानसरखो ते बंधनोनी पीडा, तथा वध आदिरूप क्रोडोगमे कष्टोथी व्याकुल थयो थको ते भवो भवमांमृत्यु पाम्यो. ॥ ५० ॥

**इत्यापदोऽतिगहनाः सहमानेन संसृतौ । तेन बह्व्योऽवसर्पिण्य उत्सर्पिण्यश्च निन्यिरे ॥ ५१ ॥**

अन्वयः—इति संसृतौ अति गहनाः आपदः सहमानेन तेन बह्व्यः अवसर्पिण्यः च उत्सर्पिण्यः निन्यिरे. ॥ ५१ ॥

अर्थः–एरीते संसारमां अति भयंकर आपदाओने सहन करतांथकां तेणे घणी अवसर्पिणीओ अने उत्सर्पिणीओने व्यतीत करी.

**सोऽकामनिर्जराक्षामकर्माथ तनुभूरभूत् । गृहिणः सिंहदत्तस्य वसन्तपुरवासिनः ॥ ५२ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः–अथ अकाम निर्जरा क्षाम कर्मा सः वसंतपुर वासिनः सिंहदत्तस्य गृहिणः तनुभूः अभूत्. ॥ ५२ ॥

अर्थः—पछी अकाम निर्जराथी कर्मोने खपावीने ते वसंतपुरमां रहेनारा सिंहदत्तनामना गृहस्थीनो पुत्र थयो. ॥ ५२ ॥

**तारुण्ये तापसीभूय तपस्तप्त्वा स दुस्तपम् । फलं त्वज्ञानकष्टस्य प्राप त्वत्पुत्रतामयम् ॥ ५३ ॥**

अन्वयः—तारुण्ये सः अयं तापसीभूय दुस्तपं तपः तप्त्वा अज्ञान कष्टस्य तु फलं त्वत् पुत्रतां प्राप. ॥ ५३ ॥

अर्थः—पछी यौवन वयमां ते तापस थइने, तथा आकरो तप तपीने, ते अज्ञानकष्टना फलरूप आपना पुत्रपणाने प्राप्त थयो.

**ऋषिघातप्रवचनद्वेषजं पापमेष तत् । तीव्राभिः कष्टकोटीभिस्ताभिस्ताभिरशोषयत् ॥ ५४ ॥**

अन्वयः—ऋषि घात प्रवचन द्वेष जं तत् पापं एषः, ताभिः ताभिः तीव्राभिः कष्ट कोटीभिः अशोषयत्. ॥ ५४ ॥

अर्थः—मुनिनी हिंसा तथा जैनशासनना द्वेषथी उत्पन्न थयेलां ते पापने तेणे ते ते आकरा क्रोडोगमे कष्टो सहन करीने खपाव्युं.

**तेन शोषितशेषेण दुरितेन तवात्मजः । अयं बभूव भूपाल रोगजालस्य भाजनम् ॥ ५५ ॥**

अन्वयः–(हे) भूपाल! शोषित शेषेण तेन दुरितेन अयं तव आत्मजः रोग जालस्य भाजनं बभूव. ॥ ५५ ॥

अर्थः–हे राजन्! खपावतां खपावतां बाकी रहेलां ते दुष्कर्मथी आ तमारो पुत्र रोगोना समूहना पात्ररूप थयो छे. ॥ ५५ ॥

**इत्युक्तिं दुःश्रवां श्रुत्वा चकम्पे चकितो नृपः । स विक्रमकुमारस्तु जातजातिस्मृतिर्जगौ ॥ ५६ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः–इति दुःश्रवां उक्तिं श्रुत्वा चकितः नृपः चकंपे, सः विक्रम कुमारः तु जात जातिस्मृतिः जगौ. ॥ ५६ ॥
अर्थः–एवी रीतनां (ते मुनिनां) दुःश्रव वचनो सांभळीने भयभीत थयेलो राजा तो कंपवा लाग्यो, अने ते विक्रम कुमार तो (पोताने) जातिस्मरण ज्ञान थवाथी बोल्यो के, ॥ ५६ ॥

**विवेकदीपमप्राप्य प्रभो मोहतमोहतः । हहा कष्टमहासिन्धौ मार्गभ्रष्टः पुरापतम् ॥ ५७ ॥**

अन्वयः—(हे) प्रभो! हहा! पुरा विवेक दीपं अप्राप्य, मोह तमः हतः मार्ग भ्रष्टः कष्ट महासिंधौ अपतं ॥ ५७ ॥
अर्थः—हे प्रभु! अरेरे! पूर्वे विवेकरूपी दीपक नही मळवाथी मोहरूपी अंधकारथी अंध थइने कुमार्गमां अथडातो थको हुं कष्ट-रूपी महासागरमां पड्यो. ॥ ५७ ॥

**इतश्चेतश्च चण्डाभिस्ताड्यमानस्तदूर्मिभिः । दैवात्तत्तीरमेत्यास्मिन्मग्नो रुक्पङ्कसंकटे ॥ ५८ ॥**

अन्वयः—चंडाभिः तत् ऊर्मिभिः इतः च इतः च ताड्यमानः दैवात् तत्तीरं एत्य अस्मिन् रुक् पंक संकटे मग्नः ॥ ५८ ॥
अर्थः–तेना भयंकर मोजांओथी आमतेम भटकातो एवो हुं दैवयोगे ते कष्टसागरने किनारे आवीने आ रोगोरूपी कादवना संकटमां सपडाइ गयो छुं. ॥ ५८ ॥

**जगद्गुरो करालम्बं तद्यच्छानवलम्बितम् । आकर्ष मामितः स्वामिन्निरीह करुणां कुरु ॥ ५९ ॥**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः—( हे ) जगत् गुरो ! ( हे ) स्वामिन् ! ( हे ) निरीह ! तत् अनवलंबितं कर आलंबं यच्छ ? मां इतः आकर्ष ? इह करुणां कुरु ? ॥ ५९ ॥

अर्थः–हे जगत् स्वामी ! हे प्रभु ! हे निःस्पृह ! माटे हवे तुरत आपना हाथनो टेको आपो ? अने आ कादवमांथी मने खेंचो ? तथा मारापर कृपा करो ? ॥ ५९ ॥

**सम्यक्त्वैकगुणप्रोतद्वादशव्रतभूषणम् । श्राद्धधर्ममथो हस्तमिव व्यस्तारयद्विभुः ॥ ६० ॥**

अन्वयः–अथो विभुः हस्तं इव, सम्यक्त्व एक गुण प्रोत द्वादश व्रत भूषणं श्राध्ध धर्मं व्यस्तारयत्. ॥ ६० ॥

अर्थः–पछी ते केवली भगवाने ( पोताना ) हाथनीपेठे सम्यक्त्वरूपी एक गुणथी ( दोरीथी ) परोवेला ( गुंथेला ) एवा बार व्रतोरूपी आभूषणवाळा श्रावकधर्मने विस्तार्यो, ॥ ६० ॥

**रोमहर्षाङ्कुराकीर्णो हर्षाश्रुकणमिश्रदृक् । जग्राह श्रावकं धर्मं विक्रमोऽथ यथाविधि ॥ ६१ ॥**

अन्वयः—अथ रोम हर्ष अंकुर आकीर्णः, हर्ष अश्रु कण मिश्र दृक् विक्रमः यथाविधि श्रावकं धर्मं जग्राह. ॥ ६१ ॥

अर्थः—पछी हर्षथी रोमांचित थयेला, तथा हर्षाश्रुना बिंदुओथी भरेली आंखोवाळा ते विक्रम कुमारे विधिपूर्वक श्रावक धर्मने अंगीकार कर्यो. ॥ ६१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूपोऽभूद्भद्रको नत्वा तौ मुनिं पुरमीयतुः । व्यहरद्वसुधां बोधिसुधाम्भोधिस्ततो मुनिः ॥ ६२ ॥

अन्वयः–ततः भूपः भद्रकः अभूत्, मुनिं नत्वा तौ पुरं ईयतुः, बोधि सुधा अंभोधिः मुनिः वसुधां व्यहरत्. ॥ ६२ ॥

अर्थः—पछी राजा पण भद्रकपरिणामी थयो, त्यारबाद ते मुनिराजने वांदीने तेओ बन्ने नगरमां गया, अने ज्ञानरूपी अमृतना महासागर सरखा ते मुनिराज पण पृथ्वीपर विहार करवा लाग्या. ॥ ६२ ॥

धर्मद्रुमूलसम्यक्त्वरसास्वादकृतादरः । छिन्नाघकन्दैर्मुमुचे व्याधिभिर्विक्रमः क्रमात् ॥ ६३ ॥

अन्वयः–धर्ममूल सम्यक्त्व रस आस्वाद कृत आदरः विक्रमः क्रमात् छिन्न अघ कंदैः व्याधिभिः मुमुचे. ॥ ६३ ॥

अर्थः—धर्मनां मूळसरखां सम्यक्त्वनो रस चाखवामां करेलो छे आदर जेणे, एवो ते विक्रमकुमार अनुक्रमे पापोनां मूळो छेदीने रागोथी मुक्त थयो. ॥ ६३ ॥

नवोल्लासितलावण्यपुण्यसर्वाङ्गचङ्गिमा । धर्मालंकरणः सोऽभून्मुक्तेरपि मनोरमः ॥ ६४ ॥

अन्वयः–नव उल्लासित लावण्य पुण्य सर्व अंग चंगिमा, धर्म अलंकरणः सः मुक्तेः अपि मनोरमः अभूत्. ॥ ६४ ॥

अर्थः—नवां प्रफुल्लित थयेलां लावण्यथी पवित्र थयेल छे सर्व शरीरनी शोभा जेनी, तथा धर्मरूपी आभूषणवाळो ते विक्रमकुमार मुक्तिने पण मनोहर लागवा लाग्यो. ॥ ६४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**निशाशेषेऽन्यदा यक्षः प्रत्यक्षः स जगाद तम् । मच्छक्त्या सज्जदेहोऽसि देहि मे महिषाञ्शतम् ॥६५॥**

अन्वयः-अन्यदा सः यक्षः निशा शेषे प्रत्यक्षः तं जगाद, मत् शक्त्या सज्ज देहः असि, मे शतं महिषान् देहि ? ॥ ६५ ॥

अर्थः—पछी एक दिवसे ते धनंजय यक्षे पाछली रात्रिए प्रत्यक्ष थइने तेने कह्युं के, मारी शक्तिथी तुं निरोगी शरीरवाळो थयोछुं, ( माटे हवे ) मने एकसो पाडाओनुं बलिदान आप ? ॥ ६५ ॥

**तमूचे विक्रमो याचनूलुलायान्किं न लज्जसे । जज्ञेऽङ्गं मुनिदिष्टेन सज्जं धर्मौषधेन मे ॥ ६६ ॥**

अन्वयः-तं विक्रमः ऊचे, लुलायान् याचन् किं न लज्जसे ? मे अंग मुनि दिष्टेन धर्म औषधेन सज्जं जज्ञे. ॥६६ ॥

अर्थः-(त्यारे) तेने ते विक्रमकुमारे कह्युं के, ( हे यक्ष ! ) पाडाओनी मागणी करतां शुं तुं शरमातो नथी ? मारुं शरीर तो मुनिराजे उपदेशेला धर्मरूपी औषधथी सारुं थयुं छे. ॥ ६६ ॥

**धर्माख्यमौषधं दृष्टप्रत्ययं कष्टतोऽर्जितम् । जीवव्यापादपापाब्धौ यक्ष कः क्षिपति प्रधीः ॥ ६७ ॥**

अन्वयः-(हे) यक्ष ! दृष्ट प्रत्ययं, कष्टतः अर्जितं धर्म आख्यं औषधं कः प्रधीः जीव व्यापाद पाप अब्धौ क्षिपति ? ॥ ६७ ॥

अर्थः—हे यक्ष ! जेनी खातरी प्रत्यक्ष जोयेली छे, तथा जे महाकष्टे मळेलुं छे, एवुं धर्मनामनुं औषध कयो सुबुद्धि माणस जीवहिंसारूपी पापना महासागरमां फेंकी दे ? ॥ ६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आचचक्षे च यक्षेशो ददास्यन्यस्य मद्यशः । ततस्तत्ते करिष्यामि कामं येनानुतप्यसे ॥ ६८ ॥

अन्वयः–च यक्ष इशः आचचक्षे, मद्यशः अन्यस्य ददासि, ततः ते तत् करिष्यामि, येन कामं अनुतप्यसे. ॥ ६८ ॥

अर्थः–पछी ते यक्षेंद्रे कह्युं के, मारो यश जे तुं बीजाने आपे छे, तेथी तने हुं एवुं करी बतावीश, के जेथी तने खूब पश्चात्ताप थशे.

इत्युदित्वा तिरोभूते यक्षे दक्षैकशेखरः । अनाकुलमनाश्चक्रे कृत्यकर्माणि विक्रमः ॥ ६९ ॥

अन्वयः—इति उदित्वा यक्षे तिरोभूते दक्ष एक शेखरः विक्रमः अनाकुल मनाः कृत्य कर्माणि चक्रे. ॥ ६९ ॥

अर्थः—एम कहीने ते यक्ष अदृश्य थयाबाद चतुरशिरोमणि एवो ते विक्रमकुमार मनमां व्याकुल थयाविना ( पोतानुं ) नित्य कार्य करवा लाग्यो. ॥ ६९ ॥

तत्रामरनिकेताख्योद्यानश्रीशेखरेऽन्यदा । जिनागारे कुमारेन्दुर्ययो कल्याणकोत्सवे ॥ ७० ॥

अन्वयः–अन्यदा कुमार इंदुः तत्र अमर निकेत आख्य उद्यान श्री शेखरे जिनागारे कल्याणक उत्सवे ययौ. ॥ ७० ॥

अर्थः–एक वखते ते कुमारचंद्र त्यां अमरनिकेतनामना उद्याननी लक्ष्मीना मुकुटसरखा जिनमंदिरमां ( प्रभुना ) कल्याणकना महोत्सवमां गयो. ॥ ७० ॥

ततः स्नात्रविलेपार्चाप्रेक्षणीयस्तवक्षणैः । जिनेन्दोर्जनयित्वैष यात्रां यावन्न्यवर्तत ॥ ७१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**अस्तम्भयद्भयव्यग्रं तावत्तस्याखिलं बलम् । निजक्रीडावनक्रोडे स धनञ्जयगुह्यकः ॥ ७२ ॥ युग्मम् ।**

अन्वयः–ततः स्नात्र विलेप अर्चा प्रेक्षणीय स्तव क्षणैः जिन इन्दोः यात्रां जनयित्वा यावत् एषः न्यवर्तत, ॥ ७१ ॥ तावत् सः धनंजय गुह्यकः निजक्रीडा वन क्रोडे तस्य भय व्यग्रं अखिलं बलं अस्तंभयत्. ॥ ७२ ॥ युग्मं ॥

अर्थः–पछी ( त्यां ) स्नात्र, विलेपन, पूजन, नाटक तथा स्तवनना महोत्सवथी ते जिनचंद्रनी भक्ति करीने जेवामां ते कुमार पाछो वळयो, ॥७१॥ तेवामां ते धनंजय यक्षे पोताना क्रीडावननी अंदर भयभीत थयेलां तेना सर्व सैन्यने स्तंभी राख्युं. ॥७२॥

**यमाग्निकौणपध्वान्तकोटिक्लृप्तामिवाथ सः । हताम्बरचरस्फूर्तिं मूर्तिं निर्माय मायया ॥ ७३ ॥**

**रोषप्लोषितया भीष्मघनघर्घरघोषया । तं क्षोणिपसुतं यक्षः साक्षेपमिदमब्रवीत् ॥ ७४ ॥ युग्मम् ॥**

अन्वयः—अथ सः यक्षः यम अग्निकौणप ध्वांत कोटि क्लृप्तां इव, हत अंबर चर स्फूर्तिं मूर्तिं मायया निर्माय, रोष प्लोषितया, भीष्म घन घर्घर घोषया ( वाचा ) तं क्षोणिप सुतं साक्षेपं इदं अब्रवीत्. ॥ ७३ ॥ ७४ ॥ युग्मं ॥

अर्थः—पछी ते यक्ष यम, अग्नि, राक्षस, तथा अंधकारना सारथी जाणे बनावी होय नही ! एवी, तथा खेचरोना गमनने पण हणनारी, एवी पोतानि मूर्ति मायाथी बनावीने, रोष भरेली, तथा भयंकर मेघगर्जना सरखा घर्घर अवाजवाळी ( भाषाथी ) ते राजपुत्रने धमकावीने कहेवा लाग्यो के, ॥ ७३ ॥ ७४ ॥ युग्मं ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न रे नराधम कथं ददासि मम कासरान् । आयुःकाण्डमकाण्डेऽपि समापयसि किं स्वकम् ॥ ७५ ॥

अन्वयः—रे ! नर अधम ! मम कासरान् कथं न ददासि ? अकांडे अपि स्वकं आयुः कांडं किं समापयसि ? ॥ ७५ ॥

अर्थः—अरे अधम पुरुष ! मने पाडा केम आपतो नथी ? तथा कवखते पण पोतानुं आयु शामाटे समाप्त करे छे ? ॥ ७५ ॥

स्मितधौताधरोऽधत्त कुमारो भारतीमथ । भो यक्ष न क्षिपामि स्वं तनुमद्घातपातके ॥ ७६ ॥

अन्वयः—अथ स्मित धौत अधरः कुमारः भारतीं अधत्त, भोः यक्ष ! तनुमत् घात पातके स्वं न क्षिपामि. ॥ ७६ ॥

अर्थः—पछी हास्यथी धोयेल छे होठ जेणे एवो ते कुमार वचन बोल्यो के, हे यक्ष ! जीवहिंसाना पापमां हुं मारा आत्माने धकेलवानो नथी. ॥ ७६ ॥

अप्यारब्धबहुत्राणाः प्राणाः कस्यापि न स्थिराः । तत्कृत्याकृत्यवित्कुर्यादकृत्यं तत्कृतेऽपि कः ॥ ७७ ॥

अन्वयः—आरब्ध बहु त्राणाः अपि कस्य अपि प्राणाः स्थिराः न, तत् कः कृत्य अकृत्यवित् तत् कृते अकृत्यं अपि कुर्यात् ?

अर्थः—घणुं रक्षण कर्या छतां पण कोइना पण प्राणो स्थिर रही शकता नथी, माटे कार्य अकार्यने जाणनारो कयो माणस ते प्राणोमाटे अकार्य पण करे ? ॥ ७७ ॥

इत्याकर्ण्य क्रुधा यक्षो विक्रमं क्रमसंग्रहात् । उत्पाट्यास्फालयद्वीचीमिवाभ्यर्णाचलेऽर्णवः ॥ ७८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः–इति आकर्ण्य यक्षः क्रुधा, अर्णवः अभ्यर्णे अचले वीचीं इव, विक्रमं क्रम संग्रहात् उत्पाट्य आस्फालयत्. ॥७८॥

अर्थः—ते सांभळीने यक्षे क्रोधथी, महासागर नजीकना खडकपर जेम मोजांओने पछाडे, तेम ते विक्रमकुमारने पग पकडी उपाडीने पछाड्यो. ॥ ७८ ॥

**मूर्छामुच्छिद्य यक्षस्तं क्रुधान्धः पुनरभ्यधात् । रे रे ददासि नाद्यापि किं मद्देयमदेयवत् ॥ ७९ ॥**

अन्वयः–यक्षः मूर्छां उच्छिद्य क्रुधा अंधः पुनः तं अभ्यधात्, रेरे! अदेयवत् अद्य अपि मद्देयं किं न ददासि? ॥ ७९ ॥

अर्थः—पछी यक्षे तेनी मूर्छा दूर करी क्रोधांध थइ फरीने तेने कह्युं के, अरे! जाणे देवुं न होय! तेम हजु पण शुं तारे मारुं करज आपवुं नथी? ॥ ७९ ॥

**कृपां करोषि जीवेषु स्वजीवे न करोषि किम् । मद्वध्यतां गतेऽमुष्मिन्धर्माविष्कारकारणे ॥ ८० ॥**

अन्वयः–जीवेषु कृपां करोषि, धर्म आविष्कार कारणे, मद् वध्यतां गते अमुष्मिन् स्व जीवे (कृपां) किं न करोषि? ॥८०॥

अर्थः—(तुं बीजा) जीवोनी तो दया करे छे, अने धर्म प्रगट करवाना कारणभूत, तथा माराथी हणाता, एवा आ पोताना जीवपर (तुं) केम दया करतो नथी? ॥ ८० ॥

**धर्माधारः कुमारोऽथ गिरं जग्राह साहसी । स्वैकजीवकृते जीवशतं को हन्ति धर्मवित् ॥ ८१ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः–अथ धर्माधारः साहसी कुमारः गिरं जग्राह, धर्मवित् कः स्व एक जीव कृते जीव शतं हंति? ॥ ८१ ॥

अर्थः–त्यारे धर्मनो आधारभूत् ते साहसिक विक्रमकुमार बोल्यो के, धर्मने जाणनारो कयो माणस पोताना एक जीवमाटे सो जीवनी हिंसा करे? ॥ ८१ ॥

**फलं तवापि धिग्यक्ष जीवलक्षनिपातनैः । इहामगन्धिकं धाम परत्र नरकव्यथा ॥ ८२ ॥**

अन्वयः–(हे) यक्ष! धिक्! जीव लक्ष निपातनैः इह तव अपि आमगंधिकं धाम फलं, परत्र नरक व्यथा. ॥ ८२ ॥

अर्थः–हे यक्ष! धिक्कार छे! के, लाखोगमे जीवोनी हिंसार्थी अहीं आ (भवमां तने) आ तारां दुर्गंधयुक्त स्थानरूपी फल मळेल छे, अने परभवमां नरकनी वेदनारूपी फळ मळशे. ॥ ८२ ॥

**त्वं धर्मादेव देवत्वं यातोऽसि प्राग्भवं स्मर । पातके जातकेलिस्तत्किमसि ज्ञानवानपि ॥ ८३ ॥**

अन्वयः—त्वं प्राग् भवं स्मर? धर्मात् एव देवत्वं यातः असि, तत् ज्ञानवान् अपि पातके जात केलिः किं असि? ॥ ८३ ॥

अर्थः–तुं तारा पूर्व भवने याद कर? धर्मथीज तुं देवपणुं पाम्यो छे, माटे ज्ञानी होवा छतां पण तुं पापकार्योमां शामाटे क्रीडा करी रह्यो छे? ॥ ८३ ॥

**पुण्यैकपरिणामेन जगदुल्लासहेतुना । तवापि युज्यते धर्तुमानन्दं वन्दनादिना ॥ ८४ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः-पुण्य एक परिणामेन, जगत् उल्लास हेतुना, वंदन आदिना तव अपि आनंदं धर्तुं युज्यते. ॥ ८४ ॥

अर्थः—(माटे) पुण्यनाज एक परिणामवाळा, तथा जगतने हर्षना कारणरूप एवां वंदनआदिकथीज (संतुष्ट थइने) तारे पण आनंद पामवो लायक छे. ॥ ८४ ॥

**इति तस्योक्तिभिर्युक्तिभिन्नाभिर्भिन्नमानसः। यक्षोऽभ्यधादहो साधु त्वयाहं प्रतिबोधितः॥ ८५॥**

अन्वयः-इति युक्ति भिन्नाभिः तस्य उक्तिभिः भिन्न मानसः यक्षः अभ्यधात्, अहो! त्वया अहं साधु प्रतिबोधितः. ॥ ८५॥

अर्थः-एरीते युक्तिवाळां तेनां वचनोथी नम्र थयेला मनवाळा ते यक्षे कह्युं के, अहो! तें मने ठीक प्रतिबोध आप्यो. ॥ ८५ ॥

**ततो नाद्यापि माद्यामि पापाहैँरङ्गिनां वधैः। नृणां प्रणाममात्रेण गमिष्यामि प्रसन्नताम्॥ ८६ ॥**

अन्वयः-ततः अद्य अपि पाप अर्हैः अंगिनां वधैः न माद्यामि, प्रणाम मात्रेण नृणां प्रसन्नतां गमिष्यामि. ॥ ८६ ॥

अर्थः—माटे हवे आजथी हुं पाप उपार्जन करनारी जीवहिंसाथी खुशी थइश नही, परंतु फक्त प्रणामथीज हुं लोकोप्रते प्रसन्न रहीश. ॥ ८६ ॥

**कुरु त्वमपि मे नाम प्रणाममलाशय। तेनैव तेऽनुमंस्येऽहं संपूर्णमखिलं खलु॥ ८७॥**

अन्वयः—हे! अमल आशय! त्वं अपि मे नाम प्रणामं कुरु? तेन एव ते अहं अनुमंस्ये, अखिलं खलु संपूर्ण. ॥ ८७ ॥

अर्थः—हे निर्मल आशयवाळा विक्रम कुमार! तुं पण मने फक्त प्रणाम कर?, अने तेथीज तारापर हुं प्रसन्न थइश, (हवे बीजी)



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सघळी (हकीकत) हुं मांडी वाळुं छुं. ॥ ८७ ॥

**कुमारोऽथ जगौ यक्ष नमस्कारो हि पञ्चधा । प्रहासविनयप्रेमप्रभुभावप्रभेद्भाक् ॥ ८८ ॥**

अन्वयः-अथ कुमारः जगौ, हे यक्ष! नमस्कारः हि प्रहास विनय प्रेम प्रभु भाव प्रभेद भाक् पंचधा. ॥ ८८ ॥

अर्थः-त्यारे कुमारे कह्युं के, हे यक्ष! नमस्कार खरेखर हांसी, विनय, प्रेम, मालिक अने भावना भेदथी पांच प्रकारनो छे.

**स प्रहासप्रणामः स्याच्चित्तोत्सङ्गितमत्सरैः । यः क्रियेत परिज्ञातविक्रियेभ्योऽपि सत्क्रियैः ॥ ८९ ॥**

अन्वयः—चित्त उत्संगित मत्सरैः सत्क्रियैः परिज्ञात विक्रियेभ्यः अपि यः क्रियेत, सः प्रहास प्रणामः स्यात्. ॥ ८९ ॥

अर्थः—मनमां मत्सर लावीने सत्कार करवानो डोळ करीने, जाणेलो छे (पोताप्रतेनो) तिरस्कार जेओनो, एवा माणसोने पण जे प्रणाम कराय छे, ते हांसीयुक्त प्रणाम कहेवाय. ॥ ८९ ॥

**तमामनन्ति विनयप्रणामं नयपण्डिताः । पित्रादिभ्या विधीयेत पुत्राद्यैर्विनयेन यः ॥ ९० ॥**

अन्वयः-पितृ आदिभ्यः पुत्र आद्यैः विनयेन यः विधीयेत, तं नय पंडिताः विनय प्रणामं आमनंति. ॥ ९० ॥

अर्थः-पिताआदिकोने पुत्रआदिको विनयथी जे प्रणाम करे छे, तेने नीतिकोविदो विनयप्रणाम माने छे. ॥ ९० ॥

**प्राहुः प्रेमप्रणामं तं प्रणयिभ्यः क्रियेत यः । कामं सप्रेमकोपेभ्यो मित्रादिभ्यः प्रसत्तये ॥ ९१ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः—प्रणयिभ्यः यः क्रियते तं प्रेम प्रणामं प्राहुः, कामं सप्रेम कोपेभ्यः मित्रादिभ्यः प्रसत्तये. ॥ ९१ ॥

अर्थः—प्रीति राखनाराओ प्रते जे कराय छे, तेने प्रेमप्रणाम कहे छे. अने ते प्रायें करीने प्रेम सहित कोपातुर थयेला मित्रो आदिकने प्रसन्न करवामाटे कराय छे. ॥ ९१ ॥

**यस्तु स्वामिनि संमानमानश्रीदानशालिनि । ऐहिकः क्रियते स्वामिनमस्कारमुशन्ति तम् ॥ ९२ ॥**

अन्वयः–तु संमान मान श्री दान शालिनि स्वामिनि यः ऐहिकः क्रियते तं स्वामि नमस्कारं उशंति. ॥ ९२ ॥

अर्थः—वळी सत्कार, आदरमान तथा लक्ष्मीदान आपनारा मालिकप्रते जे आ लोकना लाभमाटे नमस्कार करवो, तेने स्वामिनमस्कार कहे छे. ॥ ९२ ॥

**यः सद्गुरौ च देवे च वीतरागे विरच्यते । तं तु भावनमस्कारं निर्दिशन्ति विशारदाः ॥ ९३ ॥**

अन्वयः–सद्गुरौ च वीतरागे देवे च यः विरच्यते, तं तु विशारदाः भाव नमस्कारं निर्दिशंति. ॥ ९३ ॥

अर्थः–वळी उत्तम गुरुप्रते तथा रागरहित तीर्थंकर प्रभुप्रते जे नमस्कार कराय छे, तेने विद्वानो भावनमस्कार कहे छे. ॥९३॥

**विचारय त्वमेतेषु कं नमस्कारमर्हसि । इत्याकर्ण्य कुमारोक्तिमभ्यधत्त धनंजयः ॥ ९४ ॥**

अन्वयः—त्वं विचारय ? एतेषु कं नमस्कारं अर्हसि ? इति कुमार उक्तिं आकर्ण्य धनंजयः अभ्यधत्त. ॥ ९४ ॥

अर्थः—(माटे हे यक्ष!) तुं विचार के, ते पांचे नमस्कारोमांथी कया नमस्कारने तुं लायक छे ? एवीरीतनुं कुमारनुं वचन सां-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भळीने धनंजये कह्युं के, ॥ ९४ ॥

**त्वं कुमार नमस्कारं कुरु भावमयं मयि । यद्देवोऽस्मि जगत्कारसंहारोद्धारकारणम् ॥ ९५ ॥**

अन्वयः-(हे) कुमार! त्वं मयि भावमयं नमस्कारं कुरु? यत् जगत्कार संहार उद्धार कारणं देवः अस्मि. ॥ ९५ ॥

अर्थः—हे कुमार! तुं मने भावमय नमस्कार कर? केमके हुं जगतने उत्पन्न करवामां, संहार करवामां, तथा तेनो उद्धार करवामां कारणरूप देव छुं. ॥ ९५ ॥

**भवार्णवसमुत्तारतरीभूतविभूतयः । मदंशा एव भासन्ते सर्वदर्शनदेवताः ॥ ९६ ॥**

अन्वयः—भव अर्णव समुत्तार तरीभूत विभूतयः, सर्व दर्शन देवताः मत् अंशाः एव भासंते. ॥ ९६ ॥

अर्थः-(केमके) संसारसागरनो पार पामवामाटे नावसरखी समृद्धिवाळा सर्व दर्शनोना देवो मारा अंशरूपेज प्रकाशी रह्या छे. ९६

**मन्नमस्कारमात्रेण तव संसारसागरः । विक्रम क्रमलङ्घ्यत्वमनुल्लङ्घ्यो गमिष्यति ॥ ९७ ॥**

अन्वयः-(हे) विक्रम! मत् नमस्कार मात्रेण अनुल्लंघ्यः तव संसार सागरः क्रम लंघ्यत्वं गमिष्यति. ॥ ९७ ॥

अर्थः-हे विक्रम! मने फक्त नमस्कार करवाथीज, न उल्लंघी शकाय एवो पण (आ) तारो संसारसागर एक पगलेज उल्लंघी शकाशे.

**अथाब्रूत स्मितस्यूतवदनो नृपनन्दनः । मयाकृष्टः क्रियापापाद्याकूपापे यक्ष मा पत ॥ ९८ ॥**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः–अथ स्मित स्यूत वदनः नृपनंदनः अब्रूत, हे यक्ष! मया क्रिया पापात् आकृष्टः, वाक् पापे मा पत ? ॥ ९८ ॥

अर्थः–पछी हास्यथी सीवाइ गयेला मुखवाळा ते राजकुमारे कह्युं के, हे यक्ष! में तने दुष्क्रियारूपी पापमांथी तो बहार कहाड्यो छे, हवे (पाछो) तुं वचनरूपी पापमां नही पड ? ॥ ९८ ॥

**जगतां सृष्टिसंहारोद्धाराः सन्ति न सन्ति वा । इति सम्यग्न जानासि स्वमाख्यासि च तत्क्षमम् ॥९९॥**

अन्वयः–जगतां सृष्टि संहार उद्धाराः संति वा न संति, इति सम्यक् न जानासि, च स्वं तत् क्षमं आख्यासि. ॥ ९९ ॥

अर्थः—जगतनी उत्पत्ति, विनाश, के उद्धार छे के नही, तेसंबंधी पण तने पूरी समज नथी, अने पोताने ते ते कार्योमाटे समर्थ कहे छे! ॥ ९९ ॥

**यदङ्गमहसा दृष्टिः सहसा तव लुप्यते । तैः सुरेन्द्रैः स्तुतान्ख्यासि स्वांशान्दर्शनदेवताः ॥ १०० ॥**

अन्वयः–यत् अंग महसा सहसा तव दृष्टिः लुप्यते, तैः सुरेंद्रैः स्तुतान् स्व अंशान् दर्शन देवताः ख्यासि. ॥ १०० ॥

अर्थः—जेना शरीरना तेजथी एकदम तारी आंखो पण अंजाइ जाय, एवा देवेंद्रोए (पण) स्तवेला (देवाधिदेवोने) तुं तारा अंशरूप दर्शनिओना देवो कहे छे! ॥ १०० ॥

**स्वयं भवाब्धो मत्स्यस्त्वं चापलेनोपलक्ष्यसे । नमस्कारात्तदुत्तारं कुतो दिशसि मे ततः ॥ १ ॥**

अन्वयः–त्वं स्वयं भव अब्धौ चापलेन मत्स्यः उपलक्ष्यसे ततः नमस्कारात् तत् उत्तारं मे कुतः दिशसि ? ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—तुं पोते आ संसारसागरमां चपलपणाथी मत्स्यसरखो देखाय छे, तो पछी नमस्कारथी ते भवसागरथी मने पार उतारवानुं शीरीते कहे छे? ॥ १ ॥

**वचसा निष्फलेनैव तत्पापं मा वृथा कृथाः। भवेन्मम नमस्कारो भवेऽस्मिन्न जिनं विना ॥ २ ॥**

अन्वयः–तत् निष्फलेन एव वचसा वृथा पापं मा कृथाः? अस्मिन् भवे जिनं विना मम नमस्कारः न भवेत्. ॥ २ ॥

अर्थः–माटे निरर्थक वचनथीज तुं फोकट पाप न कर? केमके आ जन्ममां तीर्थंकरप्रभुविना मारो नमस्कार थइ शके एम नथी.

**इति वादिनि यक्षेन्दुर्मेदिनीनाथनन्दने। गिरं जागरयामास विवेकविमलामिमाम् ॥ ३ ॥**

अन्वयः—मेदिनी नाथ नंदने इति वादिनि यक्ष इंदुः इमां विवेक विमलां गिरं जागरयामास. ॥ ३ ॥

अर्थः—ते राजकुमारे एम कहेवाथी ते यक्षराज नीचेमुजब विवेकथी निर्मल थयेली वाणी बोलवा लाग्यो के, ॥ ३ ॥

**दद्दशे त्वादृशः कोऽपि पुमाननुपमाकृतिः। धीरो धर्मी च वाग्मो च राजपुत्र न कुत्रचित् ॥ ४ ॥**

अन्वयः—(हे) राजपुत्र! त्वादृशः अनुपम आकृतिः, धीरः, धर्मी च वाग्मी च कः अपि पुमान् कुत्रचित् न ददृशे. ॥४॥

अर्थः–हे! राजपुत्र! तारासमान अनुपम स्वरूपवाळो, धैर्यवंत, धर्मी तथा वाचाळ कोइ पण पुरुष क्यांयें पण में जोयो नथी. ।४।

**जितस्त्वयाहं वचनैस्तेनास्मि तव किंकरः। शुद्धधर्मोपदेशाच्च मम त्वमसि सद्गुरुः ॥ ५ ॥**

अन्वयः—त्वया अहं वचनैः जितः, तेन तव किंकरः अस्मि, च शुद्ध धर्म उपदेशात् त्वं मम सद्गुरुः असि. ॥ ५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अर्थः–तें मने वचनोथी जीत्यो, माटे (हुं) तारो नोकर छुं, तथा (मने) शुद्ध धर्मनो उपदेश देवाथी तुं मारो सद्‌गुरु छे.। ५ ।

**स्वचित्तकोणं वासाय निजदासाय यच्छ मे । त्वच्छिष्यो यदि जानामि तद्गतां त्वद्गुणावलीम् ॥ ६ ॥**

अन्वयः–निज दासाय मे वासाय स्व चित्त कोणं यच्छ, यदि त्वत् शिष्यः तत् गतां त्वत् गुण आवलीं जानामि. ॥ ६ ॥

अर्थः–तारा सेवक एवा मने वसवा माटे तारां हृदयनो (एक) खूणो आप? के जेथी तारो शिष्य थयेलो हुं तेमां रहेली तारा गुणोनी श्रेणिने जाणी शकुं. ॥ ६ ॥

**विभो विरहयिष्यामि निजं चेतो न च त्वया । कदापि यदि वेत्तीदं जिनसेवोत्सवं तव ॥ ७ ॥**

अन्वयः—(हे) विभो! च त्वया निजं चेतः न विरहयिष्यामि, यदि कदापि इदं तव जिन सेवा उत्सवं वेत्ति. ॥ ७ ॥

अर्थः—हे प्रभु! वळी तारी साथे मारां हृदयनो हुं विरह करीश नही, के जेथी कोइक दिवसे पण आ मारुं हृदय तारा जिन-सेवाना महोत्सवने जाणी शकशे. ॥ ७ ॥

**भर्तः स्मर्तव्य एवाहमुत्कटे संकटे क्वचित् । अयमेव हि भृत्यानां स्वामिन्यवसरः परः ॥ ८ ॥**

अन्वयः–(हे) भर्तः क्वचित् उत्कटे संकटे अहं स्मर्तव्यः एव, हि भृत्यानां स्वामिनि अयं एव परः अवसरः. ॥ ८ ॥

अर्थः–हे स्वामी! कोइक विकट संकट वखते मने याद करवोज, केमके नोकरोनो स्वामिना संबंधमां तेज उत्कृष्ट अव-सर होय छे. ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इत्युदित्वैनमापृच्छयथावगूह्य च स गुह्यकः । ययौ निजाश्रयं चित्रतच्चरित्रचमत्कृतः ॥ ९ ॥

अन्वयः-इति उदित्वा एनं आपृच्छय, च अवगूह्य सः गुह्यकः चित्र तत् चरित्र चमत्कृतः निज आश्रयं ययौ. ॥ ९ ॥

अर्थः-एम कहीने, तथा तेनी रजा लेइने, अदृश्य थइ ते यक्ष तेना आश्चर्यकारक चरित्रथी चमत्कार पामीने पोताने स्थानके गयो.

ततः प्रत्यूषशेषायां रजन्यां राजपुङ्गवः । द्रुतं विज्ञातवृत्तान्तः कुमारोपान्तमापतत् ॥ १० ॥

अन्वयः—ततः विज्ञात वृत्तांतः राजपुंगवः प्रत्यूष शेषायां रजन्यां द्रुतं कुमार उपांतं आपतत्. ॥ १० ॥

अर्थः-पछी आ वृत्तांत जाणीने राजा ( पोते ) रात्रि वीत्याबाद तुरत ते राजकुमारनी पासे आव्यो. ॥ १० ॥

मुदा कुमारमालिङ्ग्य पत्तनाय निनाय सः । बालार्करश्मिकाश्मीरनीरश्रीरम्यया भुवा ॥ ११ ॥

अन्वयः-सः मुदा कुमारं आलिंग्य बाल अर्क रश्मि काश्मीर नीर श्री रम्यया भुवा पत्तनाय निनाय. ॥ ११ ॥

अर्थः—पछी ते यक्ष हर्षथी कुमारने भेटीने, उगता सूर्यनां किरणसरखां केसरना जलनी शोभाथी मनोहर थयेली जमीनपरथी नगरमां लेइ गयो. ॥ ११ ॥

प्रत्यध्वपौरगौराङ्गीदृक्तामरसतोरणे । कुमारमुत्सवेनाथ नृपः प्रावीविशत्पुरे ॥ १२ ॥

अन्वयः-अथ नृपः प्रति अध्व पौर गौर अंगी दृक् तामरस तोरणे पुरे उत्सवेन कुमारं प्रावीविशत्. ॥ १२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अर्थः—पछी राजाए मार्गे मार्गे नगरनी स्त्रीओनी आंखोरूपी कमलोना तोरणोवाळां नगरमां महोत्सवपूर्वक ते विक्रमकुमारने प्रवेश कराव्यो. ॥ १२ ॥

**कालेन केनचिद्राज्यभारमारोप्य विक्रमे । जगाम नामशेषत्वमेष भूपालपुङ्गवः ॥ १३ ॥**

अन्वयः—केनचित् कालेन एषः भूपालपुंगवः विक्रमे राज्य भारं आरोप्य नाम शेषत्वं जगाम. ॥ १३ ॥

अर्थः—पछी केटलेक काले ते राजा ते विक्रमकुमारने राज्यनो भार सोंपीने पंचत्व पाम्यो. ॥ १३ ॥

**कुर्वन्ननित्याताध्यानसुधासिन्धूर्मिमज्जनम् । पितृशोकाग्निजं तापममुञ्चद्विक्रमो नृपः ॥ १४ ॥**

अन्वयः—विक्रमः नृपः अनित्यता ध्यान सुधा सिंधु ऊर्मि मज्जनं कुर्वन् पितृ शोक अग्निजं तापं अमुंचत्. ॥ १४ ॥

अर्थः—पछी ते विक्रमराजाए अनित्यपणाना ध्यानरूपी अमृतसागरना मोजांओमां स्नान करतांथकां पिताना शोकरूपी अग्निथी उत्पन्न थयेला तापने शांत कर्यो. ॥ १४ ॥

**विवेकं पितृशोकाग्निविशेषविशदं ततः । हृदलंकरणं चक्रे निष्कवद्विक्रमो नृपः ॥ १५ ॥**

अन्वयः—ततः विक्रमः नृपः निष्कवत् पितृ शोक अग्नि विशेष विशदं विवेकं हृद् अलंकरणं चक्रे. ॥ १५ ॥

अर्थः—पछी ते विक्रमराजाए सुवर्णनीपेठे, पिताना शोकरूपी प्रबल अग्निथी निर्मल थयेला विवेकने पोताना हृदयमां आभूषणनीपेठे धारण कर्यो. ॥ १५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न्यायकल्पद्रुमारामच्छायामध्ये निवेश्य भूः । तेनाभूष्यत सर्वाङ्गमर्हद्गृहविभूषणैः ॥ १६ ॥

अन्वयः–तेन न्याय कल्प द्रुम आराम च्छायामध्ये निवेश्य भूः सर्व अंगं अर्हद् गृह विभूषणैः अभूष्यत. ॥ १६ ॥

अर्थः—पछी तेणे न्यायरूपी कल्पवृक्षोना बगीचानी छायामां बेसीने, पृथ्वीने सर्व बाजुएथी तीर्थंकर प्रभुना मंदिरोरूपी आभूषणोवडे शणगारी. ॥ १६ ॥

सप्तव्यसननिर्मुक्तममुक्तसुकृतोद्यमम् । अभूद् भूपेऽत्र भूपीठं राजन्ते राजवत्प्रजाः ॥ १७ ॥

अन्वयः–अत्र भूपे भू पीठं सप्त व्यसन निर्मुक्तं, अमुक्त सुकृत उद्यमं अभूत्, प्रजाः राजवत् राजंते. ॥ १७ ॥

अर्थः—आ राजा राज्य करते छते पृथ्वीतळ साते व्यसनोथी रहित थयुं अने पुण्यसंबंधी उद्यमवाळुं थयुं, केमके प्रजा पण राजासरखीज तेजवाळी थाय छे. ॥ १७ ॥

आगात्तद्देशभङ्गाय कलिङ्गाधिपतिर्यमः । कदाप्याकस्मिकापातः संनिपात इवोत्कटः ॥ १८ ॥

अन्वयः–कदापि उत्कटः संनिपातः इव, कलिंग अधिपतिः यमः आकस्मिक आपातः तद् देशभंगाय आगात्. ॥ १८ ॥

अर्थः–पछी एक दिवसे विकट संनिपातनीपेठे कलिंगदेशनो राजा यम, अचानक हल्लापूर्वक तेना देशनो विनाश करवामाटे आव्यो.

दूरं देवस्य कस्यापि प्रभावाददद्भुतौजसा । हरिः स हरिणेनेवाचक्रमे तेन विक्रमः ॥ १९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः—हरिणेन हरिः इव अद्भुत ओजसा तेन कस्य अपि देवस्य प्रभावात् सः विक्रमः आचक्रमे. ॥ १९ ॥

अर्थः—पछी हरिण जेम इंद्रपर आक्रमण करे, तेम अति बळवडे करीने तेणे कोइक देवना माहात्म्यथी ते विक्रमराजापर हल्लो कर्यो. ॥ १९ ॥

**शूरमण्डलतेजांसि दूरयन्सैन्यरेणुभिः । विक्रमोऽथ धरित्रीन्दुरभ्यमित्रीणतां गतः ॥ २० ॥**

अन्वयः—अथ सैन्य रेणुभिः शूर मंडल तेजांसि दूरयन धरित्री इंदुः विक्रमः अभ्यमित्रीणतां गतः. ॥ २० ॥

अर्थः—त्यारे सैन्यनी रजथी सूर्यमंडलना तेजने पण आच्छादित करतोथको ते विक्रमराजा पण तेनी सामे थयो. ॥ २० ॥

**यमविक्रमयोर्जाग्रदुग्रविक्रमकर्मणोः । तयोः प्रववृते वीरसिंहसंहरणो रणः ॥ २१ ॥**

अन्वयः—जाग्रत् उग्र विक्रम कर्मणोः तयोः यमविक्रमयोः वीर सिंह संहरणः रणः प्रववृते. ॥ २१ ॥

अर्थः—प्रगट थता प्रचंड पराक्रमवाळा एवा ते यम तथा विक्रमराजावच्चे शूरवीरोरूपी सिंहोनो विनाश करनारो रणसंग्राम थवा लाग्यो. ॥ २१ ॥

**जातदेवानुभावौजःसंक्रमो विक्रमं यमः । जितोत्कटचमूकोटिर्विकटे संकटेऽनयत् ॥ २२ ॥**

अन्वयः—जात देव अनुभाव ओजः संक्रमः, जित उत्कट चमू कोटिः यमः विक्रमं विकटे सकटे अनयत्. ॥ २२ ॥

अर्थः—देवना प्रभावथी जेनामां तेजनुं संक्रमण थयेलुं छे एवा, तथा जीतेल छे विकट सैन्यनी कोटि जेणे एवा ते यमराजाए



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ते विक्रमराजाने अतिसंकटमां नाख्यो. ॥ २२ ॥

**पादान्ते ढौकणीकृत्य कृतदोःसंयमं यमम् । स्मृतिमात्रागतो यक्षस्तदा विक्रममैक्षत ॥ २३ ॥**

अन्वयः-तदा स्मृति मात्र आगतः यक्षः, कृतदोः संयमं यमं पाद अंते ढौकणीकृत्य विक्रमं ऐक्षत. ॥ २३ ॥

अर्थः—ते वखते फक्त याद करवाथीज आवी पहोंचेलो ते धनंजययक्ष हाथ बांधेला ते यमराजाने पगपासे भेट धरीने विक्रमराजाने जइ मळ्यो. ॥ २३ ॥

**हीनोद्यमं दीनमुखं विद्विषं वीक्ष्य विक्रमः । बन्धादुन्मोच्य देशायादिदेशाढ्यकृपाशयः ॥ २४ ॥**

अन्वयः-हीन उद्यमं, दीन मुखं विद्विषं वीक्ष्य, आढ्य कृपा आशयः विक्रमः बंधात् उन्मोच्य देशाय आदिदेश. ॥ २४ ॥

अर्थः-(कंइं पण) उद्यमविनाना अने दीनमुखवाळा ते शत्रुने जोइने उल्लसेली दयाना आशयवाळा ते विक्रमराजाए तेने बंधनरहित करावीने तेना देशमां जवानी आज्ञा आपी. ॥ २४ ॥

**मानयित्वा च नत्वा च यक्षमक्षीणसौहृदम् । अनुज्ञाय निवासय स्वपुरायाचलन्नृपः ॥ २५ ॥**

अन्वयः-च अक्षीण सौहृदं यक्षं मानयित्वा च नत्वा निवासाय अनुज्ञाय नृपः स्वपुराय अचलत्. ॥ २५ ॥

अर्थः—पछी गाढ मित्राइवाळा ते यक्षने सन्मान करीने, नमीने तथा तेने स्थाने जवानी रजा आपी ते राजा पोताना नगरतरफ चाल्यो. ॥ २५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**पुर्या मङ्गलशृङ्गारहृद्यायाः हृदयेऽविशत् । प्रतोलीदृक्पथेनाथ भूनाथः कीर्तिभूषणः ॥ २६ ॥**

अन्वयः–अथ कीर्ति भूषणः भूनाथः मंगल शृंगार हृद्यायाः पुर्याः हृदये प्रतोली दृक् पथेन अविशत्. ॥ २६ ॥

अर्थः–पछी कीर्तिरूपी आभूषणवाळो ते राजा मंगलिक अने शणगारथी मनोहर थयेली ते नगरीना मध्यमां दरवाजारूपी दृष्टिने मार्गे दाखल थयो. ॥ २६ ॥

**तस्मिन्राजनि राजन्तः पौराः सौराज्यसंपदा । महोत्सवैर्दिवो देवान्धरामानिन्यिरेऽन्वहम् ॥ २७ ॥**

अन्वयः–तस्मिन् राजनि सौराज्य संपदा राजंतः पौराः महोत्सवैः अन्वहं देवान् दिवः धरां आनिन्यिरे. ॥ २७ ॥

अर्थः—ते राजा राज्य करते छते स्वराज्यनी समृद्धिथी शोभता नागरिको महोत्सवोथी हमेशां देवोने देवलोकमांथी पृथ्वीपर लाववा लाग्या. ॥ २७ ॥

**व्रजन्भूपोऽन्यदा बाह्यावनीं वाह्यालिकेलये । किमप्योकः क्षणक्षीबास्तोकलोकमलोकत ॥ २८ ॥**

अन्वयः—अन्यदा वाह्य आलि केलये बाह्य अवनीं व्रजन् भूपः, क्षण क्षीव अस्तोक लोकं किं अपि ओकः अलोकत. ॥२८॥

अर्थः—एक दिवसे घोडाओनी श्रेणिने खेलाववामाटे बहारनी भूमिपर जता ते राजाए महोत्सवमां लीन थयेला घणां मनुष्योथी भरेलुं कोइक घर जोयुं. ॥ २८ ॥

**वाहयित्वा हयान्भूपो वलमानस्तदैव सः । अमन्दाक्रन्दसंदर्भगर्भमैक्षत मन्दिरम् ॥ २९ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः—हयान् वाहयित्वा तदैव वलमानः स भूपः मंदिरं अमंद आक्रंद संदर्भ गर्भ ऐक्षत. ॥ २९ ॥

अर्थः—(पछी) घोडाओ खेलावीने तेज वखते पाछा वळेला ते विक्रमराजाए (तेज) घर अति विलापना उछाळावाळुं जोयुं.

**विस्मयव्याकुलेनैको नरः पार्श्वचरस्ततः । पृष्टस्तत्कारणं राज्ञा विज्ञायेति व्यजिज्ञपत् ॥ ३० ॥**

अन्वयः-ततः विस्मय व्याकुलेन राज्ञा एकः पार्श्वचरः नरः तत् कारणं पृष्टः, विज्ञाय इति व्यजिज्ञपत्. ॥ ३० ॥

अर्थः—पछी आश्चर्यथी व्याकुल थयेला ते राजाए नजीकमां जनारा कोइक पुरुषने तेनुं कारण पूछवाथी तपास करीने तेणे कह्युं के, ॥ ३० ॥

**स्वामिन्नेतद्गृहेशस्य महेभ्यस्य गतेऽहनि । अपुत्रकस्य पुत्रोऽभूदन्धस्येव दृगुद्गमः ॥ ३१ ॥**

अन्वयः—(हे) स्वामिन्! गते अहनि एतद् गृह ईशस्य अपुत्रकस्य महेभ्यस्य, अंधस्य दृग् उद्गमः इव पुत्रः अभूत्.

अर्थः-हे! स्वामी! गइ काले आ घरना पुत्र रहीत मालीक एवा एक म्होटा शेठने त्यां, अंधने आंखो प्रगट थवानीपेठे, पुत्रनो जन्म थयो हतो. ॥ ३१ ॥

**इदानीमेव वाह्यालिविलासगमनक्षणे । तन्निमित्तभवोऽदर्शि देवेनेह महोत्सवः ॥ ३२ ॥**

अन्वयः-इदानीं एव वाह्य आलि विलास गमन क्षणे, देवेन इह तन्निमित्त भवः महोत्सवः अदर्शि. ॥ ३२ ॥

अर्थः-हमणाज घोडाओनी श्रेणिने खेलाववा जती वेळाए आपे आ घरमां ते पुत्रजन्मना निमित्तथी महोत्सव थतो जोयो हतो.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**अधुनैव पुनर्दैवयोगतः स मृतः शिशुः । तद्वियोगार्तिमार्गेण तत्पितापि तमन्वगात् ॥ ३३ ॥**

अन्वयः-पुनः अधुना एव दैव योगतः सः शिशुः मृतः, तत् वियोग अर्ति मार्गेण तत् पिता अपि तं अन्वगात्. ॥ ३३ ॥

अर्थः—परंतु हमणाज दैवयोगे ते बाळक मरण पाम्यो छे, अने तेना वियोगनी पीडाने मार्गे तेनो पिता पण तेनी पाछळ गयो छे, (अर्थात् मरण पाम्यो छे.) ॥ ३३ ॥

**तत्कुटुम्बजनः सर्वः पुत्रजन्मोत्सवागतः । प्रत्युत द्विगुणे दुःखे पतितो रारटीत्ययम् ॥ ३४ ॥**

अन्वयः-पुत्र जन्म उत्सव आगतः सर्वः अयं तत्कुटुंब जनः प्रत्युत द्विगुणे दुःखे पतितः रारटीति. ॥ ३४ ॥

अर्थः—पुत्रना जन्मोत्सवमाटे आवेला आ सघळा तेना कुटुंबी लोको उलटा बेवडा दुःखमां पडी विलाप करी रह्या छे. ॥३४॥

**भवनाटककौटिल्यादथोत्कण्टकविग्रहः । अव्याकुलचलच्चेताः क्षितिनेता व्यचिन्तयत् ॥ ३५ ॥**

अन्वयः—अथ भव नाटक कौटिल्यात् उत्कंटक विग्रहः, अव्याकुल चलत् चेताः क्षिति नेता व्यचिंतयत्. ॥ ३५ ॥

अर्थः—हवे आवा संसारनाटकनी मायाथी रोमांचित शरीरवाळो, तथा व्याकुलतारहित चपल हृदयवाळो ते राजा विचारवा लाग्यो के, ॥ ३५ ॥

**विदामप्यपरिच्छेद्या संसारस्य विचित्रता । जनोऽयं चिन्तयत्युच्चैरन्यदन्यच्च जायते ॥ ३६ ॥**

अन्वयः-संसारस्य विचित्रता विदां अपि अपरिच्छेद्या, अयं जनः उच्चैः अन्यत् चिंतयति, च अन्यत् जायते. ॥ ३६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—संसारनुं विचित्रपणुं विद्वानो पण न जाणी शके तेवुं छे, केमके आ लोको होंसथी चिंतवे छे बीजुं, अने थाय छे तेथी बीजुं.

**सुखाय च्छायामायाति ग्रीष्मतापातुरस्तरोः । नरस्तत्कोटरस्थेन दश्यते हा महाहिना ॥ ३७॥**

अन्वयः—ग्रीष्म ताप आतुरः नरः सुखाय तरोः छायां आयाति, हा! तत् कोटरस्थेन महाहिना दश्यते. ॥ ३७ ॥

अर्थः—उनाळाना तापथी व्याकुल थयेलो माणस शांति मेळववामाटे वृक्षनी छायामां आवे छे, परंतु अरेरे! एवामां तेना बिलमां रहेलो महान सर्प तेने दंशे छे. ॥ ३७ ॥

**वहत्यहो नरः शस्त्रं रिपोर्दारणकारणं । कदाचिदेष तेनैव दैवात्तेनैव हन्यते ॥ ३८ ॥**

अन्वयः—अहो! नरः रिपोः दारण कारणं शस्त्रं वहति, कदाचित् एषः दैवात् तेन एव तेन एव हन्यते. ॥ ३८ ॥

अर्थः—अहो! मनुष्य शत्रुने विदारवाना कारणरूप शस्त्रने धारण करे छे, परंतु कोइक दिवसे ते पोते दैवयोगे तेज शस्त्रवडे तेज शत्रुथी हणाय छे. ॥ ३८ ॥

**मनोरथानुरूपं यत्फलमाप्नोति कश्चन । महाविडम्बनाजालक्षेपविश्वासकं हि तत् ॥ ३९ ॥**

अन्वयः—कश्चन मनोरथ अनुरूपं फलं यत् आप्नोति, तत् हि महा विडंबना जाल क्षेप विश्वासकं. ॥ ३९ ॥

अर्थः—कोइक मनुष्य (पोताना) मनोरथमुजब जे अनुकूल फल पामे छे, ते खरेखर तेने महोटी आपदाओना समूहमां नाखवामाटे विश्वास उपजाववारूप होय छे. ॥ ३९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**एकान्तदुःखदे लोको विरज्य मयि मुक्तये । मा धावत्विति संसारो दत्ते सुखकणानपि ॥ ४० ॥**

अन्वयः–एकांत दुःखदे मयि विरज्य लोकः मुक्तये मा धावतु ? इति संसारः सुख कणान् अपि दत्ते. ॥ ४० ॥

अर्थः—फक्त एकलुं दुःखज आपनारा एवा माराप्रते विरक्त थइने लोको मोक्षमाटे न दोडे तो ठीक, एम विचारीने आ संसार तेओने सुखनो लेश पण आपे छे. ॥ ४० ॥

**या संसारसुखावाप्तिर्दुरन्तैव नरस्य सा । मत्स्यस्य गलिकायन्त्रनियुक्तकवलोपमा ॥ ४१ ॥**

अन्वयः–नरस्य या संसार सुख अवाप्तिः, सा मत्स्यस्य गलिका यंत्र नियुक्त कवल उपमा दुरंता एव. ॥ ४१ ॥

अर्थः—मनुष्यने संसारमां जे सुखनी प्राप्ति थाय छे, ते मत्स्योने पकडवाना यंत्रमां मूकेला कोळीयानीपेठे (अथवा मत्स्यगलागलन्यायनीपेठे) परिणामे दुःखदाइज छे. ॥ ४१ ॥

**अयं जनो मनो लोलं कथं नु कथयत्यदः । भवभावेषु यद्वज्रलेपेनेव नियन्त्रितम् ॥ ४२ ॥**

अन्वयः—वज्र लेपेन इव भव भावेषु यत् नियंत्रितं, अदः मनः अयं जनः लोलं नु कथं कथयति ? ॥ ४२ ॥

अर्थः–जाणे वज्रलेपथी चोडयुं होय नही ! तेम सांसारिक भावोमां जे चीटकी बेठेलुं छे, एवां पण मनने लोको चपल ते केम कहेता हशे ? ॥ ४२ ॥

**अलोकव्योम्नि ये लोकव्योम क्षेप्तुं क्षमा जिनाः । तदाश्रयबलाच्चित्तं कृषामि भवभावतः ॥ ४३ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः-ये जिनाः लोक व्योम अलोक व्योम्नि क्षेप्तुं क्षमाः, तत् आश्रय बलात् चित्तं भव भावतः कृषामि. ॥ ४३ ॥

अर्थः—जे तीर्थंकरो लोकाकाशने अलोकाकाशमां फेंकी देवाने समर्थ छे, तेमनी सहायना बलथी (हुं मारां) मनने आ सांसारिक भावमांथी (जालमांथी) खेंची कहाडुं. ॥ ४३ ॥

**इति ध्यायन्ययौ धाम त्वरितं नृपविक्रमः । चन्द्रसेनं सुतं राज्ये न्यस्य तस्थौ व्रतोत्सुकः ॥ ४४ ॥**

अन्वयः-इति ध्यायन् नृप विक्रमः त्वरितं धाम ययौ, चंद्रसेनं सुतं राज्ये न्यस्य व्रत उत्सुकः तस्थौ. ॥ ४४ ॥

अर्थः—एम विचारतो एवो ते विक्रमराजा तुरत पोताने स्थानके गयो, तथा (पोताना) चंद्रसेन नामना पुत्रने राज्यपर स्थापन करीने (पोते) चारित्र लेवाने उत्कंठित थइने रह्यो. ॥ ४४ ॥

**ज्ञानविज्ञाततद्भावः स्वभावकरुणाकरः । सद्गुरुः केवली काले तत्र तत्पुरमासदत् ॥ ४५ ॥**

अन्वयः-ज्ञान विज्ञात तद्भावः, स्वभाव करुणाकरः केवली सद्गुरुः तत्र काले तत् पुरं आसदत्. ॥ ४५ ॥

अर्थः-ज्ञानथी जाणेल छे तेना हृदयनो भाव जेमणे, तथा स्वभावथीज दया लावनारा, केवलज्ञानी सद्गुरु ते समये ते नगरपासे (उद्यानमां) पधार्या. ॥ ४५ ॥

**तद्वार्तावादिनं दानैरानन्द्योद्यानपालकम् । विक्रमः प्रमदस्मेरो जगामाराममुत्सुकः ॥ ४६ ॥**

अन्वयः—तद् वार्ता वादिनं उद्यान पालकं दानैः आनंद्य प्रमद स्मेरः विक्रमः उत्सुकः आरामं जगाम. ॥ ४६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः-ते समाचार कहेनारा उद्यानपालने दानथी खुशी करीने हर्षथी प्रफुल्लित थयेलो ते विक्रमराजा उत्कंठित थइने ते उद्यानमां गयो. ॥ ४६ ॥

**सोऽथ प्रदक्षिणीचक्रे गुरुं कर्मेन्धनानलम् । चिरानुरागसंबद्धां श्रद्धां परिणयन्निव ॥ ४७ ॥**

अन्वयः—अथ सः चिर अनुराग संबद्धां श्रद्धां परिणयन् इव, कर्म इंधन अनलं गुरुं प्रदक्षिणीचक्रे. ॥ ४७ ॥

अर्थः—पछी ते घणा काळना प्रेमथी संबंधमां आणेली श्रद्धाने जाणे परणतो होय नही! तेम तेणे कर्मोरूपी काष्ठोने बाळवामां अग्निसरखा ते गुरुमहाराजनी प्रदक्षिणा करी. ॥ ४७ ॥

**नत्वा गुरुं धराजानिर्यथायुक्तमथासनम् । भेजे रेजे च तद्वाणीवृष्टिसंपातचातकः ॥ ४८ ॥**

अन्वयः-अथ धरा जानिः गुरुं नत्वा यथायुक्तं आसनं भेजे, च तत् वाणी वृष्टि संपात चातकः रेजे. ॥ ४८ ॥

अर्थः—पछी ते राजा गुरुमहाराजने नमीने योग्य आसनपर बेठो, तथा तेमनी वाणीरूपी (अमृतनी) वृष्टिने चातकपक्षीनीपेठे (पीतोथको) शोभवा लाग्यो. ॥ ४८ ॥

**अथ व्रतार्थमभ्यर्थ्य यतीशं जगतीपतिः । प्रभावनार्थं तीर्थस्य जगाम नगरं पुनः ॥ ४९ ॥**

अन्वयः—अथ जगती पतिः व्रतार्थं यति ईशं अभ्यर्थ्य तीर्थस्य प्रभावनार्थं पुनः नगरं जगाम. ॥ ४९ ॥

अर्थः-पछी ते राजा दीक्षा लेवामाटे ते सूरिजीने प्रार्थना नराजने शासननी उन्नति करवामाटे पाछो नगरमां गयो. ॥ ४९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धनंजयाख्ययक्षेशकृतसान्निध्यबन्धुरः । सुरासुरचमत्कारकरोदारमहोत्सवः ॥ ५० ॥
प्रभावनाभिर्यक्षेन्द्रकृताभिः सुकृताब्धिभिः । वैधर्मिकैरपि स्तुत्यं जनयञ्जिनशासनम् ॥ ५१ ॥
पुराद्गुरुमगाद्भूपः सिद्धिलोभनरूपभाक् । भेजे भवशिरःशूलं मूलं ज्ञानतरोर्व्रतम् ॥ ५२ ॥

अन्वयः—(अथ) धनंजय आख्य यक्ष ईश कृत सान्निध्य बंधुरः, सुर असुर चमत्कार कर उदार महोत्सवः, ॥ ५० ॥ यक्ष इंद्र कृताभिः, सुकृत अब्धिभिः प्रभावनाभिः, वैधर्मिकैः अपि स्तुत्यं जिन शासनं जनयन्, ॥ ५१ ॥ सिद्धि लोभन रूप भाक् भूपः पुरात् गुरुं अगात्, भव शिरः शूलं, ज्ञान तरोः मूलं व्रतं भेजे. ॥ ५२ ॥ त्रिभिर्विशेषकं ॥

अर्थ––पछी धनंजय नामना यक्षेंद्रे करेली सहायथी मनोहर थयेलो, तथा देवो अने दानवोने पण आश्चर्य उपजावनारा उत्तम महोत्सववाळो, ॥ ५० ॥ अने यक्षेंद्रे करेली, पुण्यना महासागरसरखी प्रभावनाथी अन्यदर्शनीओने पण प्रशंसवालायक जिनशासनने करतो थको, ॥ ५१ ॥ मुक्तिने ललचावनारां रूपवाळो ते विक्रमराजा नगरमांथी गुरुमहाराज पासे गयो, (अने) संसारना मस्तकमां शूल उपजावनारुं, तथा ज्ञानरूपी वृक्षना मूलसरखुं चारित्र तेणे अंगीकार कर्युं. ॥ ५२ ॥ त्रिभिर्विशेषकं ॥

नृचन्द्रे चन्द्रसेनेऽथ नत्वा नगरगामिनि । विजहार महीं राजमहर्षिर्गुरुभिः सह ॥ ५३ ॥

अन्वयः–अथ नृ चंद्रे चंद्रसेने नत्वा नगरगामिनि राज महर्षिः गुरुभिः सह महीं विजहार. ॥ ५३ ॥

अर्थः–पछी मनुष्योमां चंद्रसरखो ते चंद्रसेन राजा ( तेमने ) वांदीने नगरमां गयाबाद ते विक्रमराजमहर्षि गुरुमहाराजनी साथे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पृथ्वीपर विहार करवा लाग्या. ॥ ५३ ॥

**श्रद्धाशुद्धतपाः शुद्धसिद्धान्तपठनक्रमः । बोधयित्वा धरां ज्ञानी स परं पद्मासदत् ॥ ५४ ॥**

अन्वयः—श्रद्धा शुद्ध तपाः, शुद्ध सिद्धांत पठन क्रमः, सः ज्ञानी धरां बोधयित्वा परं पदं आसदत्. ॥ ५४ ॥

अर्थः—श्रद्धापूर्वक शुद्ध तप करनारा, तथा निर्मलपणे आगमोना अभ्यासक्रमवाळा ते विक्रमराजर्षि केवलज्ञान पामी, पृथ्वीपर लोकोने प्रतिबोध पमाडी मोक्षे गया. ॥ ५४ ॥

**इति तत्त्वेन सम्यक्त्वं सेव्यं विक्रमवत्ततः । जनो येन भवत्याशु लोकद्वयभयव्ययः ॥ ५५ ॥**

अन्वयः—ततः इति तत्त्वेन विक्रमवत् सम्यक्त्वं सेव्यं, येन जनः आशु लोक द्वय भय व्ययः भवति. ॥ ५५ ॥

अर्थः—माटे एरीते तत्वज्ञानपूर्वक विक्रमराजर्षिनीपेठे सम्यक्त्व सेववुं, के जेथी तुरत बन्ने लोकना भयथी मुक्त थवाय छे.

**॥ इति सम्यक्त्वमाहात्म्योपदर्शने विक्रमराजर्षिचरित्रं समाप्तम् ॥**

**॥ इति श्री विक्रमभूपचरित्रं समाप्तं ॥ आ चरित्र श्रीवासुपूज्यचरित्र नामनामहाकाव्यमांथी स्वपरना श्रेयने माटे तेना अन्वय तथा गुजरातो भाषांतर करी जामनगर निवासी पंडितश्रावक हीरालाल हंसराजे पोताना श्रीजैनभास्करोदय प्रीन्टींग प्रेसमां छापी प्रसिद्ध कर्युं छे ॥ श्रीरस्तु ॥**

**॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीविक्रमभूपचरित्रं समाप्तम् ॥

For Private And Personal Use Only